श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालायाः षट्त्रिंशं पुष्पम्

संस्कृतरचनाप्रकाशः

{ तृतीयो भागः }

लेखकः

प्रा. नीलमणिढुङ्गानाः

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

बेलझुण्डी, दाङ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालायाः षट्त्रिंशं पुष्पम्

महेन्द्रसंस्कृतविश्वविद्यालयस्योत्तरमध्यमस्तरीयसंस्कृतरचनाविषयकपाठ्यक्रमे निर्धारितानां वृत्तालङ्काराणां परिचयैः समन्वितः

संस्कृतरचनाप्रकाशः

{ तृतीयो भागः }

लेखकः

प्रा. नीलमणिढुङ्गानाः

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः
बेलझुण्डी, दाङ

प्रकाशनम्
वसन्तपञ्चमी वि.सं. २०५५

प्रकाशितपुस्तकानि - १००० प्रतिरूपाणि

मूल्यम् - रू. ४२/-

कम्प्यूटरटङ्कणम्
क्वालिटी लेजर प्रिन्ट, बागबजार,
दूरभाषसङ्ख्या (फोन नं.) २४२६५६

मुद्रकः
नेपाल प्रिन्टर्स एण्ड ट्रेडर्स सहकारी लिमिटेड
फोन : ४२७४५६, ४१७६७६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुण्यप्रसाद शर्मा

सम्मतिः

महेन्द्रसंस्कृतविश्वविद्यालयस्योत्तरमध्यमस्तरे निर्धारितान् वृत्तालङ्कार-सम्बद्धान् पाठ्यविषयान् विविधेभ्यो ग्रन्थेभ्यः सङ्गृह्य नवीनया पद्धत्या व्यवस्थाप्य च प्रणीतश्छन्दोलङ्कारशिक्षणसहायकैर्लक्षणोदाहरणैः प्रत्युदाहरणैश्च समवेतः संस्कृतप्रकाशस्य तृतीयो भागः प्रकाश्यत इति विश्वविद्यालयस्यास्य प्राज्ञिकक्रियाक-लापानामुत्कर्षद्योतकोऽयं विषयः ।

संस्कृतभाषायां निबद्धानि छन्दःशास्त्राणि, अलङ्कारशास्त्राणि च विस्तृतानि वैज्ञानिकानि च विलसन्ति । परन्तु साम्प्रतं प्रचलितशिक्षणपद्धतेर्दोषात् तानि रुचिवर्धनपराण्यपि, अरुचिविधायकानि सरसान्यपि नीरसानि मृदुलान्यपि कर्कशानि प्रतीयन्ते । स्वल्पेनैव कालेन स्तोकेनैवायासेन छन्दसामलङ्काराणाञ्च ज्ञानं वाञ्छतां छात्राणां कृते तथाविधाभ्यासप्रधानग्रन्थानां न्यूनत्वमपि वर्तते वैरस्योत्पादनस्य कारणम् । संस्कृतरचनाशिक्षणे शिक्षकाणां सोत्साहायाः प्रवृत्तेरल्पत्वस्य चायमेव विद्यते हेतुः । अत एव शिक्षाध्यक्षपदभारवहनकालत एव मया स्तरानुकूलानां पाठ्यग्रन्थानां सहायकग्रन्थानां सन्दर्भग्रन्थानाञ्च नवीनपद्धत्या प्रणेतुम्, दुर्बोध-ग्रन्थानां ससमीक्षं टीकाऽनुवादादिकं विधातुञ्च संबद्धविषयविशेषज्ञा अभिप्रेरणीया इति सङ्कल्प्य तत्कार्याणि संपादयितुं विद्वांसः प्रवर्तिताः । तेषु कैश्चन विश्वविद्यालयस्य प्राज्ञिकोत्कर्षमेव निजोत्कर्षं मन्यमानैर्नवीनपद्धत्युद्भावनकुशलान्तःकरणैः क्रियावद्भिः प्राध्यापकैः कानिचिद् ग्रन्थरत्नानि प्रणीय समुपस्थापितानि । पाठ्यक्रमे निर्धारितानां विषयाणां शिक्षणायानुकूलानि तानि निभाल्य सांप्रतं मामकीनं चेतः बिभर्ति परमानन्दसन्दोहम् ।

एतादृशैः कार्यजातैः छात्राणां सुशिक्षणाय, तेषु प्राज्ञिकोत्कर्षाधानाय च विशिष्टः सहयोगः संपत्स्यत इत्यस्मिन् विषये नास्ति किमपि वक्तव्यम् । अनयैव रीत्या पाठ्यविषयसंबद्धानामन्येषामपि ग्रन्थानां प्रणयने विदुषां प्रवर्तना स्यादिति साभिनिवेशाऽभ्यर्थना मच्चेतसि सुतरां समुच्छलति ।

सन्दर्भेऽस्मिन् ग्रन्थलेखनाध्ययनाध्यापनानुसन्धानप्रशिक्षणप्रकाशनादि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कार्यजातैः प्रकाण्डपाण्डित्यपेशलानामखिलशास्त्रपारदृश्वानां मेधावतां विदुषाम्, संस्कृतवाङ्मयार्णवालोडनकुशलानां गवेषकाणाम्, भाषाम्भोनिधिमन्थनमन्दरायमाणानां भाषावैज्ञानिकानाम्, नैकविधकाव्यप्रणयनचञ्चुराणां प्रतिभावतां कवीनाम्, विविधसंस्कृतिसाहित्यानुशीलनपराणां भावकानाञ्च समुत्पादनाय महेन्द्रसंस्कृतविश्वविद्यालयः सदैव प्राध्यापकवर्याणां विदुषामवदानमपेक्षत इति निवेदयितुञ्च मदन्तःकरणं मुखरयति माम् ।

पर्यन्ते चास्य विश्वविद्यालयस्य कार्यक्रमानुसारं विविधग्रन्थेष्वाकीर्णान् विषयान् सङ्कलय्य नूतनपद्धत्या व्यवस्थापितमभ्यासप्रधानं वृत्तालङ्कारलक्षणोदाहरणप्रत्युदाहरणादिभिरन्वितैः पाठैः परिलसितं छन्दोलङ्कारशिक्षणोन्मुखं संस्कृतरचनाप्रकाशस्य तृतीयभागं निर्माय नियमितपत्रमनुसृत्य स्वाङ्गीकृतकर्तव्यस्य सम्यगनुष्ठानं कुर्वते प्राध्यापकाय श्रीनीलमणिढुङ्गानामहोदयाय सहर्षं धन्यवादं प्रयच्छन्निहैव विरमामि शब्दैरेभिः ।

माधवराजगौतमः
उपकुलपतिः
महेन्द्रसंस्कृतविश्वविद्यालयः

वसन्तपञ्चमी २०५५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशकीयम्

महेन्द्रसंस्कृतविश्वविद्यालयस्य पाठ्यक्रमे निर्धारितान् विषयानवलम्ब्य निबद्धानामनुसन्धानप्रधानानां कृतीनाम्, नवीनपद्धत्या प्रणीतानां पाठ्यग्रन्थानां सहायकग्रन्थानां सन्दर्भग्रन्थानाञ्च प्रकाशनविधौ विश्वविद्यालयोऽयं संप्रत्यग्रेसरो विद्यत इति सामोदमावेदयामि पाठकानां पुरतः।

नेदं प्राचीनयुगं यत्र छात्रा गुरुकुलवासेन गुरुकुलसम्मतैराचारैर्विचारैश्च व्यक्तित्वविकासपुरःसरं समग्राण्येव शास्त्राणि करामलकवदात्मसाच्चक्रुः, परं सांप्रतिकी शिक्षा नवीनयुगप्रदत्तप्रविधिविज्ञानजनितचमत्कारविलसिता सद्यःफल-प्रकाशनसमर्था च वर्तत इति शिक्षाविद्भिरनुभूत एव विषयः। अस्यां परिस्थितौ गुरुकुलपरम्पराप्राप्तायां संस्कृतशिक्षासरणावपि युगसम्मतानां विधीनां प्रविधीनां विज्ञानानाञ्च सन्निवेशविषये यदि कश्चन सङ्कोचः प्रदर्श्यते तदा स्यान्महती हानिरिति विचार्य महेन्द्रसंस्कृतविश्वविद्यालयोऽयं प्राचीनमर्यादां पूर्णतयाङ्गीकृत्यापि नवीन-शिक्षागतोपयोगिविषयाणां गुणानादाय समन्वयप्रधानां विशिष्टां शिक्षापद्धतिं कलयन् राष्ट्रस्य संस्कृतशिक्षायाश्चोज्ज्वलभविष्यन्निर्मितिविधावग्रेसरो वर्तते। तदनुसारेणैव पाठ्यक्रमान्निर्माय पाठ्यपुस्तकानां प्रणयनपरिष्कारादिकञ्च जायमानमस्ति।

सन्दर्भेऽस्मिन्, उत्तरमध्यमस्तरे निर्धारितानां वृत्तालङ्कारसम्बद्धानां पाठ्यां-शानां सङ्कलनं विधाय नवीनैरुदाहरणैः प्रत्युदाहरणैश्च समलङ्कृत्य वाल्मीकि-विद्यापीठस्य प्राध्यापकेन श्रीनीलमणिढुङ्गानामहोदयेन प्रणीतोऽभ्यासप्रधानश्छन्दो-लङ्कारलक्षणोदाहरणपरिलसितः संस्कृतरचनाप्रकाशस्य तृतीयो भागः प्रकाश्यत इति समुल्लेखनीयोऽयं विषयः।

प्रचलितच्छन्दसामलङ्काराणाञ्च लक्षणानि स्वल्पेन कालेन स्तोकेनायासेन च ज्ञातुमभिलषतां छात्राणां सरलया पद्धत्या शिक्षयितुं ग्रन्थोऽयं नितरामुपयोगी भवेदित्यहं मन्ये। वार्षिकपाठयोजनायामाबद्धस्य ग्रन्थस्यास्यानुशीलनेन भूयोभूयो-ऽभ्यासेन च छात्राः प्रसिद्धच्छन्दोऽलङ्काराणां ज्ञाने सामर्थ्यमधिगच्छन्तीति मामकीनः प्रत्ययः। ग्रन्थस्यास्याभ्यासेन वाल्मीकिव्यासकालिदासभारविश्रीहर्षादिभिर्महा-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कविभिः स्वस्वप्रबन्धेषु प्रयुक्तानां वृत्तालङ्काराणां निर्धारणे काव्येषु प्रयोगे च छात्राणां शक्तिरुदेष्यतीति चाहं विभावये ।

पर्यन्ते चाहर्निशं विश्वविद्यालयस्य प्राज्ञिकोत्कर्षं चिन्तयतां येषां सक्रियकार्य-प्रणाल्या सबलेन नेतृत्वेन सततप्रेरणया च कार्यमिदं सुसंपन्नं तेभ्य उपकुलपति-पदमलङ्कुर्वद्भ्यः श्रीमाधवराजगौतममहाभागेभ्यो हार्दिकीं कृतज्ञतां समर्पयामि। यस्य च विदुषः परिश्रमेण ग्रन्थोऽयं निर्मितस्तस्मै श्रीनीलमणिढुङ्गानामहोदयाय धन्यवादं प्रयच्छामि ।

पुनश्च सुन्दरकम्प्यूटरटङ्कणकारिणे बागबजारस्थ-क्वालिटीलेजरप्रिन्ट-संस्थानाय, सुरुचिरमुद्रणविधायिने डिल्लीबजारस्य नेपालप्रिन्टर्सएण्डको-अपरेटिभलिमिटेडाख्य-संस्थानाय च धन्यवादं प्रदायान्येभ्यश्च संबद्धसहयोगिभ्यः साधुवादं वितरामि ।

प्रा.डा. वावुरामपोख्रेलः
शिक्षाध्यक्षः
महेन्द्रसंस्कृतविश्वविद्यालयः

वसन्तपञ्चमी, २०५५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निवेदनं किमपि

महेन्द्रसंस्कृतविश्वविद्यालयस्य पाठ्यग्रन्थलेखनसम्बद्धं नियमितपत्रमनुसृत्योत्तरमध्यमस्तरीयपाठ्यक्रमे निर्धारितानां संस्कृतरचनाविषयसंबद्धानां पाठ्यांशानां सङ्कलनं विधाय पाठयोजनानुरूपं व्यवस्थाप्य च प्रणीतस्याभ्यासबहुलस्य संस्कृतरचनाप्रकाशस्य नूतनोदाहरणप्रत्युदाहरणसमन्वितो वृत्तालङ्कारशिक्षणोन्मुखस्तृतीयभागः प्रकाश्यमानोऽस्तीति संबद्धच्छात्राणां संस्कृतवाङ्मये प्रविविक्षूणां परमसन्तोषावहोऽयं विषयः ।

छन्दःपदं हि संवर्णार्थकाद् छदिधातोरसून्प्रत्ययेन निष्पन्नं वाङ्मयसुरक्षाकारितया छत्रवदाच्छादनादन्वर्थम् । वैदिकवाङ्मयेऽपि छन्दसोऽपरिहार्यता यत्र तत्र निर्दिष्टा । **छन्दोभिराच्छादयत्** इति छान्दोग्यवचनं छन्दोमहिमव्यञ्जकम् । चतुर्दशविद्यासु छन्दः शास्त्रञ्चैका विशिष्टा विद्येति तथ्यं **छन्दः पादौ तु वेदस्य** इति वदता पाणिनिना प्रमाणितम् । नादलयाभ्यां निश्चितवर्णमात्राविन्यासविधिना च पद्येषु सङ्गीतधर्मिताया आविष्कारकं छन्दःशास्त्रमेतज्जगति वेदाङ्गत्वेनापि सुप्रथितमस्ति। छन्दःपदमेतद् वैदिककालोत्तरवर्तिसमयेषु वेदबोधकमपि जातम् । अतः पाणिनेः **छन्दसि बहुलम्** इत्याकारकाः सौत्राः प्रयोगा अपि सङ्गच्छन्ते । लौकिकछन्दसां प्रथमप्रवक्ता शेषावतारो महर्षिः पिङ्गल इति प्रसिद्धिः । तदतिरिक्ताः सन्ति शताधिकाश्छन्दोव्याख्यातारः स्वनामधन्याः सूरयः ।

पद्यकाव्येषु प्रकीर्णविचाराणां संहतये परिपक्वतया विचारव्युत्पत्तये, काव्यसौन्दर्यसन्ततये, भावस्फीतये, चिन्तनशक्तिप्रसूतये, रसनिष्पत्तये च छन्दो हेतुभूतमिति वदन्ति तत्तत्त्वविदः । वाक्येषु चमत्काराधानाय छन्दसां वा वृत्तानां विषयानुसारितया रसानुगुणतया च प्रयोगश्छन्दोविशेषज्ञैर्निर्दिष्टः। छन्दसामुपादेयता न केवलं लयनादविच्छित्त्याधानविधावपि तु व्यङ्ग्यार्थप्रकाशनेऽपि। अतो विशिष्टेषु तेषु तेषु विषयेषु वर्णनीयेषु विशिष्टानां तेषां तेषां वृत्तानां प्रयोगा आचार्यैः संस्तुताः।

कवेर्हृत्स्पन्दनं सामान्यजनगतहृत्स्पन्दनाद् विलक्षणं भवति । कविगतं तदेव स्पन्दनं काव्यवाचि विच्छित्तिं वितनुते । प्रतिभाशाली कविविशेषः स्वरचनासु शब्दचमत्काराधानेन शब्दालङ्कारमयीमर्थचमत्काराधानेन चार्थालङ्कारमयीं रमणीयतामाविष्करोति । सहृदयः पाठकोऽपि सालङ्कृत्यैव काव्यवाचा रसास्वादं कर्तुं भवति कृतकौतुकः ।

प्रतिभापुरस्कृतेन कविनोचितस्थाने विन्यस्तः शब्दविशेषः संपद्यते सानुरणनश्चमत्कारप्राणश्च। शब्दालङ्कारजनितं साङ्गीतिकं माधुर्यं चर्वणैकप्राणायां रसानुभूतौ सहयोगि सम्पद्यते नितराम् । तदेव माधुर्यं भाषाया भौतिकं स्वरूपं सम्यगाच्छाद्य तत्र विशेषाधाने भवति परमोपकारकम् । सङ्गीतात्मा शब्दालङ्कारः शब्दस्यार्थं विस्तारयति ध्वनितरङ्गैः । उपयुक्तेन छन्दसा शब्दालङ्कारस्य संयोगे शब्दशक्त्या भवत्यपूर्वो विच्छित्तिमयो विस्तारः ।

कविरचितायां काव्यवाचि अर्थचमत्कृतिप्राणा या बहिर्जगतः प्रतिच्छविः सैवार्थालङ्कारस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पृष्ठभूमिः, यस्यां कविना शोकहर्षमोहकोपगर्वदयादीनां भावानां प्रतिबिम्ब उपस्थाप्यते । शब्दमवलम्ब्याविष्कृताश्चमत्कृतयः शब्दालङ्कारसंज्ञया, अर्थमवलम्ब्याविष्कृताश्चमत्कृतयश्चार्थालङ्कारसंज्ञया काव्येषु प्रसिद्धाः । सङ्गीतधर्मिणोऽर्थचमत्कृतिमन्तश्च मनोभावा अलङ्काररूपेण मूर्तिमन्तः सन्तो भाषामिन्द्रियग्राह्यां सहृदयहृदयाह्लादिनीञ्च निष्पादयन्तीति शब्दार्थालङ्कारयोर्निरतिशयं महत्त्वम् ।

अत एव महेन्द्रसंस्कृतविश्वविद्यालयेनोत्तरमध्यमास्तरीयपाठ्यक्रमे वाल्मीकि-व्यास-कालिदास-भारवि-माघ-श्रीहर्षादिभिः कविभिः प्रयुक्ताः प्रसिद्धाः छन्दोऽलङ्कारा निर्धारिताः। सत्यपि सुविस्तृते संस्कृतसाहित्ये विद्यमानासु च ग्रन्थनिर्माणपरम्परासु नवीनपद्धत्या प्रणीतानां पाठ्यक्रममनुसरतां पाठ्यग्रन्थानां सहायकग्रन्थानां सन्दर्भग्रन्थानाञ्च विरलतया पठनपाठनादिषु छात्रैर्यत्काठिन्यमनुभूतम्, वैरस्यञ्चाधिगतम्, तन्निवारणाय विहितोऽयं स्वल्पोऽपि प्रयासो नूनमेव फलदो भविष्यतीत्यहं विभावये ।

संस्कृतरचनाप्रकाशान्तर्गतस्य चत्वारिंशत् पाठेषु निबद्धस्य भागस्यास्य प्रथमपाठादाविंशपाठं सोदाहरणं छन्दसां लक्षणानि प्रतिपादितानि । शिक्षणकार्ये सौकर्यमानेतुञ्च विविधैः प्रश्नैः समलङ्कृत्य छन्दोलङ्काराणामभ्यासविधयः प्रदर्शिताः । एतेषां पाठानामध्ययनेन छात्रा वृत्तानां स्वरूपज्ञाने प्रयोगे च नैपुण्यमधिगच्छन्तीति मामकीनः प्रत्ययः ।

एकविंशपाठादाचत्वारिंशपाठं काव्यसौन्दर्याधायकानां शब्दालङ्काराणामर्थालङ्काराणाञ्च सोदाहरणं लक्षणानि निरूपितानि । पाठानामेतेषामभ्यासेन छात्राः काव्येषु प्रयुक्तानामलङ्काराणां निर्धारणे, तेषां प्रयोगे च प्रवीणतामधिगम्य छन्दोऽलङ्कारस्वरूपज्ञानविधौ व्युत्पन्ना भविष्यन्तीत्यहं विश्वसिमि ।

पर्यन्ते च संस्कृतरचनाविषयाध्ययने छात्रैरनुभूतं काठिन्यं विचिन्त्य भूयो भूयो ग्रन्थलेखने प्रेरयद्भ्य उपकुलपतिपदविभूषितेभ्यः श्रीमाधवराजगौतममहाभागेभ्यो हार्दिकीं कृतज्ञतां ज्ञापयामि। ग्रन्थलेखनकर्मणि सहयोगं कुर्वते शिक्षाध्यक्षपदालङ्कृताय प्रा.डा. वावुरामपोख्रेलमहाभागाय, कुलसचिवपदमण्डिताय डा. भोजराजपन्तमहाभागाय च निजां कृतज्ञतां व्यनज्मि । अस्य ग्रन्थस्य स्वरूपसम्पादने सहयोगं विदधते प्रा. डा. वेणीमाधवढकालमहोदयाय च कृतज्ञतां प्रकाशयामि सहर्षम् ।

पुनश्च ग्रन्थस्य स्वरूपसम्पादने सहयोगिनो मित्रजनान् बन्धुजनाँश्च साधुवादेन सभाजयित्वा सुन्दरकम्प्यूटरटङ्कणकारिणे क्वालिटीलेजरप्रिन्टसंस्थानाय कलात्मकमुद्रणकारिणे नेपालप्रिन्टर्स-एण्डकोअपरेटिभलिमिटेडनाम्ने मुद्रणालयाय च धन्यवादवचनानि वितरामि ।

अन्ते भ्रमप्रमादादिसमुद्भवानां त्रुटीनां कृते पाठकसन्निधौ क्षमां याचमानोऽत्रैव विरमामि।

प्रा. नीलमणिढुङ्गानाः

वसन्तपञ्चमी, २०५५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयसूची

पाठाः	विषयाः	पृष्ठसङ्ख्याः
प्रथमः पाठः	पद्यपरिचयः	१
द्वितीयः पाठः	गणपरिचयः	३
तृतीयः पाठः	आर्यापरिचयः	५
चतुर्थः पाठः	अनुष्टुब्वृत्तपरिचयः	७
पञ्चमः पाठः	उपजातिवृत्तपरिचयः	९
षष्ठः पाठः	रथोद्धतावृत्तपरिचयः	१३
सप्तमः पाठः	शालिनीवृत्तपरिचयः	१५
अष्टमः पाठः	स्वागतावृत्तपरिचयः	१७
नवमः पाठः	दोधकवृत्तपरिचयः	१९
	तोटकवृत्तपरिचयः	२०
दशमः पाठः	द्रुतविलम्बितवृत्तपरिचयः	२२
एकादशः पाठः	वंशस्थवृत्तपरिचयः	२४
द्वादशः पाठः	वसन्ततिलकवृत्तपरिचयः	२६
त्रयोदशः पाठः	मालिनीवृत्तपरिचयः	२८
चतुर्दशः पाठः	मन्दाक्रान्तापरिचयः	३०
पञ्चदशः पाठः	पृथ्वीवृत्तपरिचयः	३२
षोडशः पाठः	शिखरिणीवृत्तपरिचयः	३४
सप्तदशः पाठः	शार्दूलविक्रीडितपरिचयः	३६
अष्टादशः पाठः	स्रग्धरावृत्तपरिचयः	३८
एकोनविंशः पाठः	सुन्दरीवृत्तपरिचयः	४०
विंशः पाठः	वृत्तोपस्थितितालिका	४२
एकविंशः पाठः	अलङ्कारपरिचयः	४४
द्वाविंशः पाठः	अलङ्कारप्रकारः	४६
त्रयोविंशः पाठः	अनुप्रासपरिचयः	४८
चतुर्विंशः पाठः	यमकालङ्कारपरिचयः	५०
पञ्चविंश; पाठः	श्लेषालङ्कारपरिचयः	५२
षड्विंशः पाठः	उपमालङ्कारपरिचयः	५४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तविंशः पाठः	उत्प्रेक्षालङ्कारपरिचयः	५७
अष्टाविंशः पाठः	रूपकालङ्कारपरिचयः	५९
एकोनत्रिंशः पाठः	अतिशयोक्त्यलङ्कारपरिचयः	६०
त्रिंशः पाठः	अपह्नुत्यलङ्कारपरिचयः	६२
एकत्रिंशः पाठः	दीपकालङ्कारपरिचयः	६४
द्वात्रिंशः पाठः	समासोक्त्यलङ्कारपरिचयः	६६
त्रयस्त्रिंशः पाठः	दृष्टान्तालङ्कारपरिचयः	६८
चतुस्त्रिंशः पाठः	स्वभावोक्त्यलङ्कारपरिचयः	७०
पञ्चत्रिंशः पाठः	अर्थान्तरन्यासालङ्कारपरिचयः	७२
षट्त्रिंशः पाठः	परिसङ्ख्यालङ्कारपरिचयः	७४
सप्तत्रिंशः पाठः	विरोधाभासालङ्कारपरिचयः	७६
अष्टत्रिंशः पाठः	संसृष्ट्यलङ्कारपरिचयः	७८
ऊनचत्वारिंशः पाठः	सङ्करालङ्कारपरिचयः	८०
चत्वारिंशः पाठः	अलङ्कारोपस्थित्यभ्यासः	८२



CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथमः पाठः

पद्यपरिचयः

१.१ *पद्यस्य लक्षणम्*

यत्र चत्वारः पादा भवन्ति तत् पद्यमिति निगद्यते । पद्धातोर्यत्प्रत्यये पद्यमिति निष्पद्यते । तस्य लक्षणं यथा छन्दोमञ्जर्याम् –

'चतुष्पदि पद्यम्' इति

एकस्मिन् पद्ये चत्वारः पादा भवन्तीति सरलार्थः । उदाहरणं यथा –

नरपतिहितकर्ता त्यज्यते पार्थिवेन्द्रै-
र्जनपदहितकर्ता द्वेष्यतामेति लोके ।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ।।

अत्र चत्वारः पादाः सन्ति । अत एतत्पद्यमस्ति ।

१.२ *पद्यभेदाः*

पद्यं द्विविधम् – वृत्तम्, जातिश्च । यत्र अक्षरैर्गणना भवति तद् वृत्तम्, यत्र च पुनर्मात्राभिर्गणना जायते सा जातिरिति निगद्यते । तदेवोक्तम् –

अक्षरैर्गणना यत्र तद् वृत्तमिति कथ्यते ।
मात्राभिर्गणना यत्र सा जातिरभिधीयते ।।

१.३ *वृत्तं त्रिविधम्*

समचतुष्पादम्, अर्धसमपादम्, विषमपादञ्च । यत्र चत्वारः पादाः समाना-स्तत्समचतुष्पादमिति निगद्यते । यथा –

वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयं पक्वफलाम्बुभोजनम् ।
तृणानि शय्या रुचिरञ्च वल्कलं
न बन्धुमध्ये धनहीनजीवनम् ।।

अत्र चत्वार एव पादाः समानाः। अतो वंशस्थविलं नामेदं पद्यं समचतुष्पादम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्र प्रथमपादेन तुल्यस्तृतीयपादः, द्वितीयपादेन तुल्यश्चतुर्थपादस्तदर्ध-समपादमुच्यते । यथा –

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा
अपि वागधिपस्य दुर्वचं
वचनं तद्विदधीत विष्मयम् ।

अत्र प्रथमपादस्तृतीयपादेन, द्वितीयपादश्चतुर्थपादेन तुल्यौ स्तः । अतः सुन्दर्यां रचितमिदं पद्यमर्धसमपादमिति । यत्र चत्वार एव पादा भिन्नलक्षणास्तद् विषम-पादवृत्तम् । यथा –

अथ वासवस्य वचनेन
रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं
विधिवत्तपांसि विदधे धनञ्जयः ।

अत्र चत्वार एव पादा असमानलक्षणाः, अत उद्गतायां लिखितमिदं वृत्तं विषमपादवृत्तम् ।

१.४ जाति च नवधा

पथ्या, विपुला, चपला, मुखचपला, जघनचपला, गीतिः, उपगीतिः, उद्गीतिः, आर्यागीतिश्चेति ।

१.५ निम्नप्रश्नानामुत्तराणि लिखत ।

१. पद्यस्य किं लक्षणम् ? किञ्च तस्योदाहरणम् ।
२. पद्यस्य कति भेदाः ? कानि च तेषां सोदाहरणानि लक्षणानि ?
३. जातिवृत्तयोः को भेदः ?
४. समपादार्धसमपादविषमपादानां लक्षणानि, उदाहरणानि च कानि ?
५. समपादार्धसमपादवृत्तयोः, समपाद–विषमपादवृत्तयोः को भेदः ? सोदाहरणं निरूपयत ।
६. निम्नपद्यस्याशयं प्रकाशयत ।

पद्यं चतुष्पदि तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ।।
सममर्धसमं वृत्तं विषमञ्चेति तत् त्रिधा ।
समं समचतुष्पादं भवत्यर्धसमं पुनः ।।
आदिस्तृतीयवद् यस्य पादस्तूर्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्तितम् ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयः पाठः

गणपरिचयः

२.१ *गणनामानि*

छन्दः शास्त्रे त्र्यक्षराणामेको गणः कल्पितोऽस्ति । तस्य सङ्ख्या चाष्टौ विद्यते। तदुक्तं छन्दोमञ्जर्याम् –

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ।।

२.२ *तेषां परिचयो यथा –*

मस्त्रीगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ।।

पिङ्गलसूत्रेऽपि –

आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।
यारता लाघवं यान्ति मनौ तु गुरुलाघवम् ।।

यथा –

गणनामानि	गणपरिचयः	गणसङ्केताः	उदाहरणानि
भगणः	आदिगुरुः	ऽ।।	खादति
जगणः	मध्यगुरुः	।ऽ।	करोति
सगणः	अन्त्यगुरुः	।।ऽ	कुरुतः
यगणः	आदिलघुः	।ऽऽ	अकुर्वन्
रगणः	मध्यलघुः	ऽ।ऽ	कुर्वते
तगणः	अन्त्यलघुः	ऽऽ।	कुर्वन्ति
मगणः	सर्वगुरुः	ऽऽऽ	कुर्वाते
लघुः	ल	।	न
गुरुः	ग	ऽ	का
नगणः	न	।।।	पवन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२.३ *गुरुलघुनिर्देशः*

गुरुरेको गकारस्तु लकारो लघुरेककः ।
क्रमेण चैषां रेखाभिः संस्थानं दर्शितं मया ।।

२.४ *गुरुलघुसिद्धान्तः*

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्णसंयोगपूर्वश्च तथा पादान्तगोऽपि वा ।।

२.५ *यतिपरिचयः*

यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ।।

२.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. कति गणाः, के च ते ?
२. भजसादिगणानां रेखाभिः परिचयं निर्दिशत ।
३. भ–ज–सगणाः कुत्र कुत्र गौरवं यान्ति ? लिखत ।
४. य–र–तगणाः कुत्र लघुतां भजन्ते ? दर्शयत ।
५. मनयोर्गणयोः स्वरूपमुल्लिखत ।
६. छन्दोगतां गुरुलघुव्यवस्थां प्रकाशयत ।
७. यतेर्लक्षणं विलिख्य तद्वाचकान् पयार्यशब्दान्निर्दिशत ।
८. निम्नपद्यानामाशयं स्फुटं प्रकाशयत ।
   क) आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।
   यारता लाघवं यान्ति मनौ तु गरुलाघवम् ।।
   ख) सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
   वर्णसंयोगपूर्वश्च तथा पादान्तगोऽपि वा ।।
   ग) गुरुरेको गकारस्तु लकारो लघुरेककः ।
   क्रमेण चैषां रेखाभिः संस्थानं दर्शितं मया ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीयः पाठः

आर्यापरिचयः

३.१ *आर्यास्वरूपम्*

आर्यावृत्ते	– प्रथमपादे द्वादशमात्रा भवन्ति । – द्वितीयपादेऽष्टादशमात्रा भवन्ति । – तृतीयपादे द्वादशमात्रा भवन्ति । – चतुर्थपादे पञ्चदशमात्रा भवन्ति ।

३.२ *आर्यालक्षणम्*

यस्याः प्रथमतृतीयपादयोः प्रत्येकं द्वादशमात्राः, द्वितीये पादेऽष्टादशमात्राः, चतुर्थे च पादे पञ्चदशमात्रा भवन्ति सा आर्येति निगद्यते । तल्लक्षणं यथा–

यस्याः पादे प्रथमे
द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये
चतुर्थके पञ्चदश साऽऽर्या ।।

३.३ *उदाहरणं यथा*

अज्ञः सुखमाराध्यः
सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं
ब्रह्मापि तं नरं नरञ्जयति ।।

अत्र प्रथमतृतीयपादयोः प्रत्येकं द्वादशमात्राः, द्वितीये पादेऽष्टादशमात्राः, चतुर्थे च पादे पञ्चदशमात्राः प्रयुक्ताः सन्ति । अतः पद्यमिदमार्याछन्दस उदाहरणं विद्यते ।

३.४ *उदाहरणान्तराणि यथा*

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ।।१।।
अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।
परपरिवादनिवृत्तैः क्वचित् क्वचिन्मण्डिता वसुधा ।।२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ।।३।।
सिहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ।।४।।

३.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. एषु प्रतिपादं काः का मात्राः सन्ति प्रयुक्ताः ?
२. दानं भोगो० अप्रियवचन० सिंहः शिशु० इति पद्यत्रयं कस्य छन्दस उदाहरणानि ? कथञ्च तेषु लक्षणसङ्गतिः ?
३. आर्याछन्दसो लक्षणं विलिख्योदाहरणे सङ्गमयत ।
४. आर्याछन्दसः प्रथमे, द्वितीये, तृतीये, चतुर्थे च पादे कतिमात्रा भवन्ति ?
५. आर्याछन्दस उपरितनपद्येभ्योऽतिरिक्तानि पञ्चपद्यान्यन्विष्य लिखत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्थः पाठः

अनुष्टुब्वृत्तपरिचयः

४.१ *अनुष्टुब्वृत्तस्वरूपम्*

अनुष्टुब्वृत्ते	- प्रतिपादमष्टौ वर्णाः प्रयुज्यन्ते । 8 - सर्वेषु पादेषु पञ्चमो वर्णो लघुर्भवति । 5 - द्विचतुर्थयोः सप्तमो वर्णो लघुर्भवति । 7 - सर्वेष्वेव पादेषु षष्ठो वर्णो गुरुर्भवति । 6

४.२ *अनुष्टुब्वृत्तस्य लक्षणम्*

यस्य वृत्तस्य चतुर्ष्वेव पादेषु पञ्चमवर्णो लघुर्भवति, द्विचतुर्थयोः पादयोः सप्तमवर्णो लघुर्जायते, सर्वेष्वेव पादेषु षष्ठवर्णो गुरुर्भवति, तद्वृत्तम् 'अनुष्टुभ्' इति कथ्यते । तल्लक्षणं यथा -

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरुर्विजानीयात् शेषेषु नियमो नहि ।।

अक्षरमिति शेषः ।

४.३ *उदाहरणं यथा*

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।।

अत्र सर्वेषु पादेषु पञ्चमवर्णः, द्वितीयचतुर्थपादयोश्च सप्तमवर्णो लघुर्विद्यते, चतुर्ष्वेव पादेषु षष्ठवर्णो गुरुरस्ति । अतः पद्यमिदमनुष्टुब्वृत्तस्योदाहरणम् ।

४.४ *उदाहरणान्तराणि यथा*

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र चन्दनं न वने वने ।।१।।
अधमा धनमिच्छन्ति धनं मानञ्च मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ।।२।।
अजरामरवत्प्राज्ञो विद्यामर्थञ्च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ।।३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्या ददाति विनयं विनयाद् याति पात्रताम् ।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मस्ततः सुखम् ।।४।।
यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ।।५।।
पुण्यतीर्थे कृतं येन तपः क्वाप्यतिदुष्करम् ।
तस्य पुत्रो भवेद् वश्यः समृद्धो धार्मिकः सुधीः ।।६।।
को धन्यो बहुभिः पुत्रैः कुशूलापूरणाढकैः ।
वरमेकः कुलालम्बी यत्र विश्रूयते पिता ।।७।।
ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी ।
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ।।८।।
मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ।।९।।
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ।।१०।।

४.५ *अधोलिखितप्रश्नामुत्तराणि लिखत ।*

१. अनुष्टुब्वृत्ते का विशेषता दृश्यन्ते, गणयत ।
२. अनुष्टुब्वृत्तस्य लक्षणं विलिख्योदाहरणे सङ्गमयत ।
३. निम्नपद्येष्वनुष्टुब्वृत्तस्य लक्षणं कथं सङ्गच्छते ? प्रकाशयत ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ।।१।।
दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ।।२।।
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।।३।।
परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ।।४।।
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स हि पण्डितः ।।५।।
वृत्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता ।
गर्भादुत्पतिते जन्तौ मातुः प्रसवतः स्तनौ ।।६।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चमः पाठः

उपजातिवृत्तपरिचयः

५.१ *उपजातिवृत्तस्वरूपम्*

इन्द्रवज्रावृत्ते	प्रतिपादं	– एकादशाक्षराणि भवन्ति । – त (ऽऽ।) त (ऽऽ।) ज (।ऽ।) गणानां द्वयोर्गुरुवर्णयोः (ऽऽ) च प्रयोगः ।
उपेन्द्रवज्रावृत्ते	प्रतिपादं	– एकादशाक्षराणि भवन्ति । – ज (।ऽ।) त (ऽऽ।) ज (।ऽ।) गणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः ।
उपजातिवृत्ते	प्रतिपादं	– इन्द्रवज्रोपेन्द्रवज्रयोः, तदन्ययोर्वा मिश्रणं भवति ।

५.२ *इन्द्रवज्राया लक्षणम्*

यस्य वृत्तस्य प्रतिपादं क्रमेण ततजगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगो भवति तद्वृत्तम् 'इन्द्रवज्रा' इति कथ्यते । तल्लक्षणं यथा –

स्यादिन्द्रवज्रा यदि तौ जगौ गः ।

५.३ *उदाहरणं यथा*

सर्वौषधीनाममृतं प्रधानं
सर्वेषु सौख्येष्वशनं प्रधानम् ।
सर्वेन्द्रियाणां नयनं प्रधानं
सर्वेषु गात्रेषु शिरःप्रधानम् ।।

अत्र चतुर्षु पादेषु क्रमेण ततजगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः । अत पद्यमिदमिन्द्रवज्राया उदाहरणम् ।

५.४ *उदाहरणान्तरं यथा*

गन्धः सुवर्णे फलमिक्षुदण्डे
नाकारि पुष्पं खलु चन्दनस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्वान् धनाढ्यश्च नृपश्चिरायु -
धातुः पुरा कोऽपि न बुद्धिदोऽभूत् ।।१।।

५.५ *उपेन्द्रवज्रालक्षणम्*

यस्य वृत्तस्य प्रतिपादं क्रमेण जतजगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगो भवति तद्वृत्तम् 'उपेन्द्रवज्रा' इति निगद्यते । तल्लक्षणं यथा -

उपेन्द्रवज्रा जतजास्ततो गौ ।

५.६ *उदारहणं यथा*

अपायसन्दर्शनजां विपत्ति-
मुपायसन्दर्शनजाञ्च सिद्धिम् ।
समीक्षका नीतिगुणप्रयुक्तां
पुरःस्फुरन्तीमिव वर्णयन्ति ।।

अत्र प्रतिपादं क्रमेण जतजगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः । अतः पद्यमिद- मुपेन्द्रवज्राया उदाहरणम् ।

५.७ *उदाहरणान्तरं यथा*

यदैव राज्ये क्रियतेऽभिषेक-
स्तदैव याति व्यसनेषु बुद्धिः ।
घटा नृपाणामभिषेककाले
सहाम्भसैवापदमुद्गिरन्ति ।।

५.८ *उपजातिलक्षणम्*

यत्र द्वयोर्वृत्तयोः प्रायश इन्द्रवज्रोपेन्द्रवज्रयोः सम्मिश्रणं भवति तत् उपजाति- वृत्तमुच्यते । तल्लक्षणं यथा -

अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु
वदन्ति जातिष्विदमेव नाम ।।

५.९ *उदाहरणं यथा*

अर्थागमो नित्यमरोगिता च
प्रिया च भार्या प्रियवादिनी च
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड् जीवलोकस्य सुखानि राजन्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र प्रथमतृतीयचतुर्थपादेषु इन्द्रवज्रायाः (प्रत्येकं क्रमेण ततजगणानां द्वयोर्गुरुवर्णयोश्च) प्रयोगः, द्वितीये च पादे उपेन्द्रवज्राया (क्रमेण जतजगणानां द्वयोर्गुरुवर्णयोश्च) प्रयोगः । अतः पद्यमिदमिन्द्रवज्रोपेन्द्रवज्रयोर्मिश्रणादुपजातिवृत्तस्योदाहरणम् । एवमेव वंशस्थेन्द्रवंशादेरपि ।

५.१० *उदाहरणान्तराणि यथा*

न निर्मितः केन न दृष्टपूर्वः
न श्रूयते हेममयः कुरङ्गः ।
तथापि तृष्णा रघुनन्दनस्य
विनाशकाले विपरीतबुद्धिः ।।१।।
यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ।।२।।
आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलु सज्जनानाम् ।।३।।
रत्नैर्महार्हैस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद् विरमन्ति धीराः ।।४।।
धनानि भूमौ पशवश्च गोष्ठे
भार्या गृहद्वारि जनः श्मसाने ।
देहश्चितायां परलोकमार्गे
कर्मानुगो गच्छति जीव एकः ।।५।।

५.११ *अधोलिखित प्रश्नानामुत्तराणि लिखत*

१. इन्द्रवज्रोपेन्द्रवज्रयोः किं लक्षणम् ? कश्च तयोर्भेदः ?
२. उपजातिवृत्तस्य लक्षणमुदाहरणे समन्वयत ।
३. निम्नपद्यानि कस्य वृत्तस्योदाहरणानि ? स्फुटं प्रकाशयत ।

जाता वनान्ताः शिखिसुप्रमत्ता
जाताः कदम्बाः सकदम्बशाखा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जाता वृषा गोषु समानकामा
जाता मही शस्यवनाभिरामा ।।
वहन्ति वर्षन्ति नदन्ति भान्ति
ध्यायन्ति नृत्यन्ति समाश्वसन्ति
नद्यो घना मत्तगजा वनान्ताः
प्रियाविहीनाः शिखिनः प्लवङ्गमाः ।।
प्रहर्षिताः केतकिपुष्पगन्ध-
माघ्राय मत्ता वननिर्झरेषु ।
प्रपातशब्दाकुलिता गजेन्द्राः
सार्धं मयूरैः समदा नदन्ति ।।
क्वचित् प्रगीता इव षट्पदौघैः
क्वचित् प्रनृत्ता इव नीलकण्ठैः ।
क्वचित् प्रमत्ता इव वारणेन्द्रै
र्विभान्त्यनेकाश्रयिणो वनान्ताः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षष्ठः पाठः

रथोद्धतावृत्तपरिचयः

६.१ रथोद्धतावृत्तस्वरूपम्

रथोद्धतावृत्ते	प्रतिपादं	- एकादशाक्षराणि प्रयुज्यन्ते । - र (ऽ।ऽ) न (।।।) र (ऽ।ऽ) गणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः ।

६.२ रथोद्धतावृत्तलक्षणम्

यस्य वृत्तस्य प्रतिपादं क्रमेण र-न-रगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगो भवति तद्वृत्तं रथोद्धतेति कथ्यते । तल्लक्षणं यथा-

रात्परैर्नरलगै रथोद्धता ।

६.३ उदाहरणं यथा

गम्यते यदि मृगेन्द्रमन्दिरे
लभ्यते करिकपोलमौक्तिकम् ।
जम्बुकालयगतेन लभ्यते
वत्सपुच्छखुरचर्मखण्डनम् ।।

अत्र प्रतिपादं क्रमेण र-न-रगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः। अतः पद्यमिदं रथोद्धताया उदाहरणम् ।

६.४ उदाहरणान्तराणि यथा -

बोधितोऽपि बहुसूक्तिविस्तरैः
किं खलो जगति सज्जनो भवेत् ।
स्नापितोऽपि बहुशो नदीजलै-
र्गर्दभो किमु हयो भवेत्क्वचित् ।।

जायतामिदमराक्षसं जगत्
वीर्यतोऽद्य भुजदण्डयोर्मम ।
यातु यातुनगरी विनष्टतां
दीर्घतोरणचिता सकानना ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूयतां मम शिरोधिरासनं
तेऽधुनाम्ब परिपश्यसि प्रियम् ।
रोचते तव यथा वदस्व मां
तत्करोमि रघुनाथ-वल्लभे ।।
राधिका दधिविलोडनस्थिता
कृष्णवेणुनिनदैरथोद्धता ।
यामुनं तटनिकुञ्जमञ्जसा
सा जगाम सलिलाहृतिच्छलात् ।।

६.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. रथोद्धतायाः किं लक्षणम् ?
२. रथोद्धताया लक्षणं लक्ष्ये सङ्गमयत ।
३. निम्नपद्यानि कस्य वृत्तस्योदाहरणानि, कथञ्च तेषु लक्षणसङ्गतिः ?
४. रथोद्धतायां कति गणाः प्रयुज्यन्ते ? के च ते ?
५. रथोद्धतायाः प्रतिपादं कत्यक्षराणि सन्ति ? लिखत ।
६. उक्तपद्येभ्योऽतिरिक्तानि रथोद्धतायाः पञ्चपद्यान्यन्विष्य लिखत ।
७. सोदाहरणं निम्नपद्यांशस्याशयं प्रकाशयत ।
रात्परैर्नरलगै रथोद्धता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तमः पाठः

शालिनीवृत्तपरिचयः

७.१ *शालिनीवृत्तस्वरूपम्*

शालिनीवृत्ते	प्रतिपादं	- एकादशाक्षराणि प्रयुज्यन्ते । - क्रमेण म (ऽऽऽ) त (ऽऽ।) त (ऽऽ।) गणानां द्वयोर्गुरुवर्णयोः (ऽऽ) च प्रयोगः। - चतुर्थे तदनु सप्तमे चाक्षरे विश्रामः ।

७.२ *शालिनीवृत्तलक्षणम्*

यत्र प्रतिपादं क्रमेण मगणस्य, तगणयोर्द्वयोर्गुरुवर्णयोश्च प्रयोगो भवति तच्छालिनीवृत्तमिति निगद्यते । लक्षणं यथा -

मात्तौ गौ चेच्छालिनी वेदलोकैः ।

वृत्तेऽस्मिन् चतुर्थे वर्णे, तदनु च सप्तमेऽक्षरे विश्रामो भवति ।

७.३ *उदाहरणं यथा*

बुद्धिर्येषां संप्रभूतप्रकर्षा
स्तेऽमी धन्या सिद्धिभाजश्च कार्ये ।
अन्ये भूयो हन्त पाषाणकल्पाः
किञ्चित् कार्यं नैव कर्तुं समर्थाः ।।

अत्र प्रतिपादं क्रमेण म-त-तगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगाच्छालिनीवृत्तम्।

७.४ *उदाहरणान्तराणि यथा*

१. **काके शौचं द्युतकारे च सत्यं**
सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः ।
क्लीबे धैर्यं मद्यपे तत्त्वचिन्ता
राजा मित्रं केन दृष्टं श्रुतं वा ।।

२. **अंहो हन्ति ज्ञानवृद्धिं विधत्ते**
धर्मं धत्ते काममर्थञ्च सूते
मुक्तिं दत्ते सर्वदोपास्यमाना

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुंसां श्रद्धाशालिनी विष्णुभक्तिः

३. चित्ते भ्रान्तिर्जायते मद्यपानात्
भ्रान्ते चित्ते पापचर्यामुपैति ।
पापं कृत्वा दुर्गतिं यान्ति मूढा-
स्तस्मान्मद्यं नैव पेयं न पेयम् ।।

४. नष्टं द्रव्यं प्राप्यते ह्युद्यमेन
नष्टा विद्या प्राप्यतेऽभ्यासयुक्त्या ।
नष्टारोग्यं सूपचारैः सुसाध्यं
नष्टा वेला या गता सा गतैव ।।

७.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. शालिनीवृत्ते कति गणाः प्रयुज्यन्ते, के च ते ?
२. शालिनीवृत्तस्य किं लक्षणम्, सोदाहरणं निरूपयत ।
३. चित्ते भ्रान्ति० इत्यत्र शालिनीवृत्तस्य लक्षणं कथं सङ्गच्छते ? प्रकाशयत ।
४. काके शौचम्० इत्यस्मिन् पद्ये शालिन्या लक्षणं सङ्गमयत ।
५. सोदाहरणं निम्नपद्यांशस्याशयं प्रदर्शयत ।
मात्तौ गौ चेच्छालिनी वेदलोकैः ।
६. शालिन्यां कुत्र कुत्र च विश्रामः ? सोदाहरणं निरूपयत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टमः पाठः

स्वागतावृत्तपरिचयः

८.१ स्वागतावृत्तस्वरूपम्

स्वागतावृत्ते	प्रतिपादं	- एकादशाक्षराणि भवन्ति । - र (ऽ।ऽ) न (।।।) भ (ऽ।।) गणानां द्वयोर्गुरु-वर्णयोः (ऽऽ) च प्रयोगः ।

८.२ स्वागतावृत्तलक्षणम्

यत्र पद्ये प्रतिपादं क्रमेण रगण-नगण-भगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगस्तदा स्वागतावृत्तं भवति । तल्लक्षणं यथा -

स्वागतेति रनभाद् गुरुयुग्मम् ।

८.३ उदाहरणं यथा

नीललोहितमुखच्युतवाचा
यातुधानपुरि बद्धपदं यम्
रावणं भर निशाचरि ! मां त्वं
मोचयेति वदतीव शुकोऽस्याम् ।

अत्र प्रतिपादं क्रमेण र-न-भगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगाद् स्वागतावृत्तम्।

८.४ उदाहरणान्तराणि यथा

१. वाममुष्टिनिहताऽप्यसौ मया
चण्डमारुतहतेव चञ्चला
भैरवं रवमुदीर्य भूतले
राक्षसी पतितमूर्छितोत्थिता
यस्य चेतसि सदा मुरवैरी
वल्लवीजनविलासविलोलः ।
तस्य नूनममरालयभाजः
स्वागतादरकरः सुरराजः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्य वक्त्रकुहरे सुभाषितं
नास्ति नाप्यवसरे प्रगल्भति
आगतः सदसि धीमतामसौ
लेप्यनिर्मित इवावभाषते ।।

सज्जनस्य हृदयं नवनीतं
यद्वदन्ति कवयस्तदलीकम् ।
अन्यदेहविलसत्परितापात्
सज्जनो द्रवति नो नवनीतम् ।।

सर्वथा स्वहितमाचरणीयम् ।
किं करिष्यति जनो बहुजल्पः ।
विद्यते नहि स कश्चिदुपायः
सर्वलोकपरितोषकरो यः ।।

कस्यचित्किमपि नो हरणीयं
मर्मवाक्यमपि नोच्चरणीयम् ।
श्रीपतेः पदयुगं स्मरणीयं
लीलया भवजलं तरणीयम् ।।

८.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. स्वागताछन्दसि प्रतिपादं कति गणाः प्रयुज्यन्ते, के च ते ?
२. स्वागतावृत्तस्य किं लक्षणम्, कथञ्च लक्ष्ये लक्षणसङ्गतिः ?
३. यस्य वक्त्रकुहरे० इत्यत्र कथं स्वागता वृत्तस्य लक्षणं सङ्गच्छते ? स्फुटीकुरुत।
४. निम्नपद्यांशस्याशयं सोदाहरणं प्रकाशयत ।
   स्वागतेति रनभाद् गुरुयुग्मम् ।
५. वाममुष्टि० यस्य चेतसि० इति पद्यद्वये स्वागतावृत्तस्य लक्षणं सङ्गमयत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नवमः पाठः

दोधकवृत्तपरिचयः

९.१ *दोधकवृत्तस्वरूपम्*

दोधकवृत्ते	प्रतिपादं	– एकादशाक्षराणि भवन्ति – क्रमेण भ (ऽ।।) भ (ऽ।।) भ (ऽ।।) गणानां द्वयोर्गुरुवर्णयोः (ऽऽ) च प्रयोगः।

९.२ *दोधकवृत्तस्य लक्षणम्*

यत्र प्रतिपादं क्रमेण त्रयाणां भगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगस्तद् दोधकवृत्तं निगद्यते । तल्लक्षणं यथा छन्दोमञ्जर्याम् –

दोधकमिच्छति भत्रितयाद् गौः ।

९.३ *उदाहरणं यथा*

देव ! सदोधकदम्बतलस्थ !
श्रीधर ! तावकनामपदं मे ।
कण्ठतलेऽसुविनिर्गमकाले
स्वल्पमपि क्षणमेष्यति योगम् ।।

अत्र प्रतिपादं क्रमेण त्रयाणां भगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः । अतः पद्यमिदं दोधकवृत्तम् ।

९.४ *उदाहरणान्तरं यथा*

कुङ्कुमपङ्ककलङ्कितदेहा
गौरपयोधरकम्पितहारा ।
नूपुरहंसरणत्पदपद्मा
कं न वशीकुरुते भुवि रामा ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१.५ *तोटकवृत्तपरिचयः*

तोटकवृत्ते	प्रतिपादं	- द्वादशाक्षराणि प्रयुज्यन्ते । - स (।।ऽ) स (।।ऽ) स (।।ऽ) स (।।ऽ) गणानां प्रयोगो भवति ।

१.६ *तोटकलक्षणम्*

यत्र प्रतिपादं क्रमेण चतुर्णां सगणानां प्रयोगो भवति तत् तोटकमिति निगद्यते। तल्लक्षणं यथा -

वद तोटकमब्धिसकारयुतम् ।

१.७ *उदाहरणं यथा*

मणिना वलयं वलयेन मणिः
मणिना वलयेन विभाति करः ।
कविना च विभुर्विभुना च कविः
कविना विभुना च विभाति सभा ।।

अत्र प्रतिपादं क्रमेण चतुर्णां सगणानां प्रयोगात् तोटकं नाम वृत्तम् ।

१.८ *उदाहरणान्तराणि*

शशिना च निशा निशया च शशी
शशिना निशया च विभाति नभः ।
पयसा कमलं कमलेन पयः
पयसा कमलेन विभाति सरः ।।१।।

यमुनातटमच्युतकेलिकला-
लसदङ्घ्रिसरोरुहसङ्गरुचिम् ।
मुदितोऽट कलेरपनेतुमघं
यदि चेच्छसि जन्म निजं सफलम् ।।२।।

उडुराजमुखी मृगराजकटि-
र्गजराजविराजितमन्दगतिः ।
यदि सा वनिता हृदये निहिता
क्व जपः क्व तपः क्व समाधिरतिः ।।३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. दोधकवृत्ते प्रतिपादं कति गणा भवन्ति, के च ते ?

२. दोधकवृत्तस्य किं सामान्यलक्षणम्, किञ्च तस्योदाहरणम् ?

३. दोधकवृत्तस्य लक्षणमुदाहरणे सङ्गमयत ।

४. कुङ्कुमेति पद्ये कथं दोधकलक्षणसङ्गतिः ? निरूपयत ।

५. सोदाहरणं निम्नपद्यांशस्याशयं प्रकाशयत ।

दोधकमिच्छति भत्रितयाद् गौ ।

६. तोटकस्य किं लक्षणम् ? सोदाहरणं प्रकाशयत ।

७. तोटके कतिगणाः प्रयुज्यन्ते, के च ते ?

८. शशिना० उडुराज० इत्यत्र कथं तोटकलक्षणसङ्गतिः ? विमृशत ।

९. यमुनातट० इत्यत्र सलक्षणं तोटकवृत्तस्य लक्षणं सङ्गमयत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दशमः पाठः

द्रुतविलम्बितवृत्तपरिचयः

१०.१ द्रुतविलम्बितवृत्तस्वरूपम्

द्रुतविलम्बितवृत्ते	प्रतिपादं	– द्वादशाक्षराणि भवन्ति । – क्रमेण न (।।।) भ (ऽ।।) भ (ऽ।।) र (ऽ।ऽ) गणानां प्रयोगो भवति ।

१०.२ द्रुतविलम्बितलक्षणम्

यत्र प्रतिपादं क्रमेण नगणस्य, भगणयोः, रगणस्य च प्रयोगो भवति तं द्रुतविलम्बितं कथयन्ति । तल्लक्षणं यथा –

द्रुतविलम्बितमाह नभौ भरौ ।

१०.३ उदाहरणं यथा

सुतनु ! ते तनुते न गवेषणं
विरहितो रहितो दयया धवः ।
भज हृदा हृदयङ्गममाशरं
त्यज पुरा स्वधवीकृतमानवम् ।।

अत्र प्रतिपादं क्रमेण न–भ–भ–रगणानां प्रयोगाद् द्रुतविलम्बितं नाम वृत्तम्।

१०.४ उदाहरणान्तराणि यथा

अयि नितम्बिनि तं विनिकेतनं
वनचरं स्मर मा स्मर मा वरम् ।
निवस मानिनि मानिनि मे गृहे
विलसता लस तालवने मया ।।१।।

द्रुतविलम्बितरामशिलीमुख-
स्तव वलीमुख ! संमुखमागतः ।
नवसमागम एव परेतता -
मतनुतातनुपापकरीं मम ।।२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सरसि पद्मरसं भ्रमरो यथा
पिबति झङ्कृतशब्दसमन्वितः ।
वपुषि ते रघुनायकसायकः
स च तथा किल हृद्रुधिरं पपौ ।।३।।

अलिरयं नलिनीदलमध्यगः
कमलिनीमकरन्दमदालसः ।
विधिवशात्परदेशमुपागतः
कुटजपुष्परसं बहु मन्यते ।।४।।

अपि दलन्मुकुले बकुले यया
पदमधायि कदापि न हेलया
अहह सा सहसा विधुरे विधौ
मधुकरी वदरीमनुसेवते ।।५।।

१०.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. द्रुतविलम्बितवृत्ते कति गणाः भवन्ति ? के च ते ?
२. द्रुतविलम्बितवृत्तस्य किं लक्षणम् ? सोदाहरणं प्रकाशयत ।
३. अयि नितम्बिनि० इत्यत्र द्रुतविलम्बितवृत्तस्य लक्षणं कथं सङ्गच्छते, निरूपयत ।
४. सरसि पद्मरसम्० इत्यत्र द्रुतविलम्बितलक्षणं सङ्गमयत ।
५. द्रुतविलम्बितवृत्ते रचितान्यन्यानि त्रीणि पद्यान्यन्विष्य लिखत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकादशः पाठः

वंशस्थवृत्तपरिचयः

११.१ *वंशस्थवृत्तस्वरूपम्*

वंशस्थवृत्ते	प्रतिपादं	- द्वादशाक्षराणि भवन्ति - क्रमेण ज (।ऽ।) त (ऽऽ।) ज (।ऽ।) र (ऽ।ऽ) गणानां प्रयोगः ।

११.२ *वंशस्थवृत्तलक्षणम्*

यत्र प्रतिपादं क्रमेण ज-त-ज-रगणानां प्रयोगस्तद् वंशस्थविलमिति वृत्तमुदीर्यते । तल्लक्षणं यथा -

वदन्ति वंशस्थविलं जतौ जरौ

११.३ *उदाहरणं यथा*

वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयं पक्वफलाम्बुभोजनम् ।
तृणानि शय्या रुचिरञ्च वल्कलं
न बन्धुमध्ये धनहीनजीवनम् ।।

अत्र प्रतिपादं क्रमेण जतजरगणानां प्रयोगः । अतोऽत्र वंशस्थविलं वृत्तम्।

११.४ *उदाहरणान्तराणि यथा*

कुदेशमासाद्य कुतोऽर्थसञ्चयः
कुपुत्रमासाद्य कुतो जलाञ्जलिः ।
कुगेहिनीं प्राप्य गृहे कुतः सुखं
कुशिष्यमध्यापयतः कुतो यशः ।।१।।

गुणी गुणं वेत्ति न वेत्ति निर्गुणो
बली बलं वेत्ति न वेत्ति निर्बलः ।
पीको वसन्तस्य गुणं न वायसः
करी च सिंहस्य बलं न मूषकः ।।२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुले कलङ्कः कवले कदन्नता
सुतः कुबुद्धिर्भवने दरिद्रता ।
रुजः शरीरे कलहप्रिया प्रिया
गृहागमे दुर्गतयः षडेते ।।३।।
सुखं हि दुःखान्यनुभूय शोभते
घनान्धकारेष्विव दीपदर्शनम् ।
सुखात्तु यो याति नरो दरिद्रतां
धृतः शरीरेण मृतः स जीवति ।।४।।

११.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. वंशस्थवृत्तस्य किं लक्षणम् ? सोदाहरणं निरूपयत ।

२. वंशस्थवृत्ते कति गणाः प्रयुज्यन्ते, के च ते ?

३. कुले कलङ्क इत्यत्र वंशस्थवृत्तस्य लक्षणं कथं सङ्गच्छते ? स्फुटं प्रकाशत।

४. सोदाहरणं निम्नपद्यभागस्याशयं प्रदर्शयत ।

वदन्ति वंशस्थविलम्बितं जरौ ।

५. वंशस्थविलम्बितवृत्तस्य कुदेश० गुणी गुणम्० इत्यनयोः पद्ययोर्लक्षणसङ्गतिं निर्दिशत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वादशः पाठः

वसन्तलितकवृत्तपरिचयः

१२.१ *वसन्ततिलकवृत्तस्वरूपम्*

वसन्ततिलकवृत्ते	प्रतिपादं	- चतुर्दशाक्षराणि भवन्ति । - त (ऽऽ।) भ (ऽ।।) ज (।ऽ।) ज (।ऽ।) गणानां द्वयोर्गुरुवर्णयोः (ऽऽ) च प्रयोगो भवति ।

१२.२ *वसन्ततिलकलक्षणम्*

यत्र प्रतिपादं क्रमेण त-भ-ज-जगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगस्तद्वृत्तं वसन्ततिलकमिति समुदीर्यते । तल्लक्षणं यथा -

ज्ञेयं वसन्ततिलकं तभजा जगौ गः

१२.३ *उदाहरणं यथा*

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।।

अत्र प्रतिपादं क्रमेण त-भ-ज-जगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगाद् वसन्ततिलकं वृत्तम् ।

१२.४ *उदाहरणान्तराणि यथा*

संवर्धितोऽपि भुजगः पयसा न वश्य-
स्तत्पालकानपि निहन्ति बलेन सिंहः ।
दुष्टः परैरुपकृतस्तदनिष्टकारी
विश्वासलेश इह नैव बुधैर्विधेयः ।।१।।
जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ।।२।।
प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजना न परित्यजन्ति ।।३।।
सर्पाः पिबन्ति पवनं न च दुर्वलास्ते
शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवरा क्षपयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम् ।।४।।
यः प्रीणयेत्सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं य-
देतत्त्रयं जगति पुण्यकृतो लभन्ते ।।५।।
एकः खलोऽपि यदि नाम भवेत्सभायां
मोघीकरोति विदुषां निखिलप्रयासम् ।
एकाऽपि पूर्णमुदरं मधुरैः पदार्थै-
रालोड्य रेचयति हन्त न मक्षिका किम् ।।

१३.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. वसन्ततिलकवृत्ते प्रतिपादं कति गणाः प्रयुज्यन्ते, के च ते ?
२. वसन्ततिलकवृत्तस्य किं लक्षणम्, कथञ्चोदाहरणे तल्लक्षणसङ्गतिः?
३. शास्त्रण्य० जाड्यं० प्रारभ्यते० इति पद्यत्रये वसन्ततिलकवृत्तस्य लक्षणं सङ्गमयत ।
४. सोदाहरणं निम्नपद्यांशस्याशयं प्रकाशयत ।
ज्ञेयं वसन्ततिलकं तभजा जगौ गः ।
५. वसन्तलितकवृत्तस्यान्यानि त्रीण्युदाहरणान्यन्विष्य लिखत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रयोदशः पाठः

मालिनीवृत्तपरिचयः

१३.१ *मालिनीवृत्तस्वरूपम्*

मालिनीवृत्ते	प्रतिपादं	- पञ्चदशाक्षराणि भवन्ति । - न (।।।) न (।।।) म (ऽऽऽ) य (।ऽऽ) य (।ऽऽ) गणानां प्रयोगः । - अष्टमे तदनु सप्तमेऽक्षरे विश्रामः ।

१३.२ *मालिनीवृत्तस्य लक्षणम्*

यत्र प्रतिपादं क्रमेण न-न-म-य-यगणानां प्रयोगस्तद्वृत्तं मालिनीवृत्तमित्युच्यते । तल्लक्षणं यथा -

ननमयययुतेयं मालिनी भोगिलोकैः

१३.३ *उदाहरणं यथा*

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ।।

अत्र प्रतिपादं क्रमेण न-न-म-य-यगणानां प्रयोगः, अष्टमे तदनु सप्तमे चाक्षरे विश्रामः । अतः पद्यमिदं मालिनीवृत्तस्योदाहरणम् ।

१३.४ *उदाहरणान्तराणि यथा*

स हि गगनविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुरपि विधियोगाद् ग्रस्यते राहुणासौ ।
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ।।१।।

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीतलं याति वह्निः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ।।२।।

शशिनि खलु कलङ्कः कण्टकः पद्मनाले
युवतिकुचनिपातः पक्वता केशजाले ।
जलधिजलमपेयं पण्डिते निर्धनत्वम् ।
वयसि धनविवेको निर्विवेको विधाता ।।३।।

उचितमनुचितं वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ।।४।।

१३.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. मालिनीवृत्ते प्रतिपादं कति गणाः प्रयुज्यन्ते, के च ते ?
२. मालिनीवृत्तस्य किं लक्षणम्, सोदाहरणं निरूपयत ।
३. स हि गगन० उदयति० शशिनि० इति पद्यत्रये मालिनीवृत्तस्य लक्षणं कथं सङ्गच्छते ? स्फुटं प्रकाशयत ।
४. मालिनीवृत्ते कुत्र कुत्र विश्रामः ? सोदाहरणं निर्दिशत ।
५. सोदाहरणं निम्नपद्यांशस्य तात्पर्यं निर्दिशत ।
ननमयययुतेयं मालिनी भोगिलोकैः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्दशः पाठः

मन्दाक्रान्तापरिचयः

१४.१ *मन्दाक्रान्तास्वरूपम्*

मन्दाक्रान्तावृत्ते	प्रतिपादं	- सप्तदशाक्षराणि भवन्ति । - म (ऽऽऽ) भ (ऽ।।) न (।।।) त (ऽऽ।) त (ऽऽ।) गणानां द्वयोर्गुरुवर्णयोः (ऽऽ) च प्रयोगः । - चतुर्थे, तदनु षष्ठे, ततः सप्तमे चाक्षरे विश्रामः।

१४.२ *मन्दाक्रान्तावृत्तस्य लक्षणम्*

यस्मिन् पद्ये प्रतिपादं क्रमेण म-भ-न-त-तगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगो भवति तद्वृत्तं मन्दाक्रान्तेति निगद्यते । तल्लक्षणं यथा -

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।

अत्र चतुर्थे, तदनु षष्ठे, तत्पश्चात्सप्तमे चाक्षरे यतिर्भवति ।

१४.३ *उदाहरणं यथा*

मौनान्मूकः प्रवचनपटुर्जल्पको वातुलो वा
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।
धृष्टः पार्श्वे वसति च सदा दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ।

अत्र प्रतिपादं क्रमेण म-भ-न-त-तगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः । चतुर्थे, तदनु षष्ठे, तत्पश्चात् सप्तमे चाक्षरे विश्रामः । अतः पद्यमिदं मन्दाक्रान्ताया उदाहरणम्।

१४.४ *उदाहरणान्तराणि यथा*

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुदण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ।।१।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।।२।।
केनादिष्टौ कमलकुमुदोन्मीलने पुष्पवन्तौ
विश्वं तोयैः स्नपयितुमसौ केन वा वारिवाहः ।
विश्वानन्दोपचयचतुरो दुर्जनानां दुरापः
श्लाघ्यो लोके जयति महतामुज्ज्वलोऽयं निसर्गः ।।३।।
कस्यादेशात् क्षपयति तमः सप्तसप्तिः प्रजानां
छायाहेतोः पथि विटपिनामञ्जलिः केन बद्धः ।
अभ्यर्थ्यन्ते जललवमुचः केन वा वृष्टिहेतो-
र्जात्यैवैते परहितविधौ साधवो बद्धकक्षाः ।।४।।

१४.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. मन्दाक्रान्ताछन्दसि प्रतिपादं कति गणा भवन्ति, के च ते ?
२. मन्दाक्रान्तायाः केष्वक्षरेषु विश्रामः ?
३. मन्दाक्रान्तायाः सामान्यलक्षणं किम् ? कथञ्चोदाहरणे तल्लक्षणं सङ्गच्छते? निरूपयत ।
४. निम्नपद्यांशस्य सोदाहरणमाशयं प्रकाशयत
मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।
घृष्टं घृष्टं०, धूमज्योति०, इति पद्यद्वये मन्दाक्रान्तावृत्तस्य कथं लक्षणसङ्गतिः? विमृशत ।
५. केनादिष्टौ० कस्यादेशात्० इति पद्यद्वये मन्दाक्रान्तावृत्तस्य लक्षणं सङ्गमयत।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चदशः पाठः

पृथ्वीवृत्तपरिचयः

१५.१ *पृथ्वीवृत्तस्वरूपम्*

पृथ्वीवृत्ते	प्रतिपादं	- सप्तदशाक्षराणि भवन्ति । - क्रमेण ज (।ऽ।) स (।।ऽ) ज (।ऽ।) स (।ऽ।) य (।ऽऽ) गणानामेकस्य लघुवर्णस्य, एकस्य गुरुवर्णस्य च प्रयोगः । - अष्टमे, तदनु नवमे चाक्षरे विश्रामः ।

१५.२ *पृथ्वीवृत्तस्य लक्षणम्*

यस्य वृत्तस्य प्रतिपादं क्रमेण ज-स-ज-स-यगणानामेकस्य लघुवर्णस्यैकस्य च गुरुवर्णस्य च प्रयोगः, अष्टमे, तदनु नवमे चाक्षरे विश्रामस्तद्वृत्तं पृथ्वीति कथ्यते । तल्लक्षणं यथा -

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।

१५.३ *उदाहरणं यथा*

दुरन्तदनुजेश्वरप्रकरदुःस्थपृथ्वीभरं
जहार निजलीलया यदुकुलेऽवतीर्याशु यः ।
स एष जगतां पतिर्दुरितभारमस्मादृशां
हरिष्यति हरिः स्तुतिस्मरणचाटुभिस्तोषितः ।

अत्र प्रतिपादं क्रमेण ज-स-ज-स-यगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः, अष्टमे तदनु नवमे चाक्षरे विश्रामः । अतः पद्यमिदं पृथ्वीवृत्तस्योदाहरणम् ।

१५.४ *उदाहरणान्तराणि यथा*

जहाति सहसाननं झटिति पृच्छति स्वागतं
नमस्यति कृताञ्जलिः श्रुतिमनोहरं भाषते ।
ददाति कुसुमं फलं श्लथयत्यभीष्टां क्रिया -
महो ! न परिचीयते कृपणवञ्चनाचातुरी ।।१।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अयश्चणकचर्वणं फणिफणामणेः कर्षणं
करेण गिरितोलनं जलनिधेः पदा लङ्घनम् ।
प्रसुप्तहरिबोधनं निशितखड्गसंस्पर्शनं
कदाचिदखिलं भवेन्न च शठाद् धनस्यार्जनम् ।।२।।
जयन्ति जितमत्सराः परहितार्थमभ्युद्यताः
पराभ्युदयसुस्थिताः परविपत्तिखेदाकुलाः ।
महापुरुषसत्कथाश्रवणजातकौतूहला
समस्तदुरितार्णवप्रकटसेतवः साधवः ।।३।।

१५.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. पृथ्वीवृत्ते प्रतिपादं कति गणाः प्रयुज्यन्ते, के च ते ?
२. पृथ्वीवृत्तस्य लक्षणं सोदाहरणं निरूपयत ?
३. जहाति० अयश्चणक० जयन्ति० इति पद्यत्रये कथं पृथ्वीवृत्तलक्षणसङ्गतिः? प्रदर्शयत ।
४. निम्नपद्यांशस्याशयं सोदाहरणं स्फुटीकुरुत ।
जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।
५. पृथ्वीवृत्ते कुत्र कुत्र च विश्रामः ? सोदाहरणं प्रकाशयत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षोडशः पाठः

शिखरिणीवृत्तपरिचयः

१६.१ *शिखरिणीवृत्तस्वरूपम्*

शिखरिणीवृत्ते	प्रतिपादं	- सप्तदशाक्षराणि भवन्ति । - य(।ऽऽ) म(ऽऽऽ) न(।।।) स(।।ऽ) भ (ऽ।।) गणानामेकस्य लघुवर्णस्यैकस्य गुरु-वर्णस्य च प्रयोगः। - षष्ठे, तदनु चैकादशेऽक्षरे विश्रामः ।

१६.२ *शिखरिणीवृत्तस्य लक्षणम्*

यत्र प्रतिपादं क्रमेण य-म-न-स-भगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः, षष्ठे तदनु चैकादशेऽक्षरे विश्रामस्तद्वृत्तं शिखरिणीति निगद्यते। तल्लक्षणं यथा -

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।

१६.३ *उदाहरणं यथा*

नभो भूषा पूषा कमलवनभूषा मधुकरो
वचोभूषा सत्यं वरविभवभूषा वितरणम् ।
मनोभूषा मैत्री मधुसमयभूषा व्रततयः
सदोभूषा सूक्तिः सकलगणभूषा च विषयः ।

अत्र प्रतिपादं क्रमेण य-म-न-स-भगणानामेकस्य लघुवर्णस्यैकस्य गुरु-वर्णस्य च प्रयोगः, षष्ठे, तदनु चैकादशेऽक्षरे विश्रामः । अतः पद्यमिदं शिखरिणी-वृत्तस्योदाहरणम् ।

१६.४ *उदाहरणान्तराणि यथा*

यदा किञ्चिद्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ।।१।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विजेतव्या लङ्का चरणतरणीयो जलनिधि-
विंपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाप्येको रामः सकलमवधीद् राक्षसकुलं
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ।।२।।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरः
क्वचिद् भूमौ शय्या क्वचिदपि च पर्यङ्कशयनः ।
क्वचिद् भिक्षावृत्तिः क्वचिदपि च मृष्टाशनरुचि-
र्महात्मा योगेशो न गणयति दुःखं न च सुखम् ।।३।।

१६.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. शिखरिणीवृत्ते प्रतिपादं कति गणाः प्रयुज्यन्ते, के च ते ?
२. शिखरिणीवृत्तस्य किं लक्षणम् ? सोदाहरणं प्रकाशयत ।
३. यदा किञ्चिद्ज्ञोऽहम्० विजेतव्या० क्वचित्कन्थाधारी० इति पद्यत्रये शिखरिणीवृत्तस्य लक्षणं कथं सङ्गच्छते ? विमृशत ।
४. निम्नपद्यांशस्याशयं सोदाहरणं निरूपयत ।

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तदशः पाठः

शार्दूलविक्रीडितपरिचयः

१७.१ *शार्दूलविक्रीडितस्वरूपम्*

शार्दूलविक्रीडित-वृत्ते	प्रतिपादं	- एकोनविंशत्यक्षराणि भवन्ति । - म (ऽऽऽ) स (।।ऽ) ज (।ऽ।) स (।।ऽ) त (ऽऽ।) त (ऽऽ।) गणानामेकस्य गुरुवर्णस्य च प्रयोगः । - द्वादशे, तदनु सप्तमे चाक्षरे विश्रामः।

१७.२ *शार्दूलविक्रीडितलक्षणम्*

यत्र प्रतिपादं क्रमेण म-स-ज-स-त-तगणानामेकस्य गुरुवर्णस्य च प्रयोगस्तत् 'शार्दूलविक्रीडितम्' इति वृत्तं निगद्यते । तस्य लक्षणं यथा -

सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितम् ।

१७.३ *उदाहरणं यथा*

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्।

अत्र प्रतिपादं क्रमेण म-स-ज-स-त-तगणानामेकस्य गुरुवर्णस्य च प्रयोगः। प्रतिपादं द्वादशे, तदनु सप्तमे चाक्षरे विश्रामः । अतः पद्यमिदं शार्दूलविक्रीडित-वृत्तस्योदाहरणम् ।

१७.४ *उदाहरणान्तराणि यथा*

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः ।।१।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्षान्तिश्चेत् कवचेन किं किमरिभिः क्रोधोऽस्ति चेद् देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद् दिव्यौषधैः किं फलम् ।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्याऽनवद्या यदि
व्रीडा चेत् किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ।।२।।
माता निन्दति नाभिनन्दति पिता भ्राता न संभाषते
भृत्यः कुप्यति नानुगच्छति सुतः कान्ता च नालिङ्गते ।
अर्थप्रार्थनशङ्कया न कुरुते संभाषणं वै सुहृद्
तस्माद् द्रव्यमुपार्जयस्व सुमते द्रव्येण सर्वे वशाः ।।३।।
पित्रोर्नैव वचः शृणोति दिवसत्यागे व्रजत्यालयम्
यान्तीभिर्युवतीभिरध्वनि मुहुः कौतूहलं विन्दति
वन्धूनामुपदेशवाचि वदति क्रोधैकतानं वचः
साधून्निन्दति दुर्जनञ्च मनुते मित्रं कुपुत्रो जनः ।।४।।

१७.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. शार्दूलविक्रीडितछन्दसि प्रतिपादं कति गणाः प्रयुज्यन्ते ? के च ते?

२. शार्दूलविक्रीडितवृत्तस्य किं सामान्यलक्षणम्, कथञ्च तस्योदाहरणे समन्वयः?

३. विद्यानाम० क्षान्तिश्चेत्० इति पद्यद्वये कथं शार्दूलविक्रीडितछन्दसो लक्षणं सङ्गच्छते ? निरूपयत ।

४. सोदाहरणमधस्तनपद्यांशस्याशयं प्रकाशयत ।
सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।

५. शार्दूलविक्रीडितवृत्ते प्रतिपादं कुत्र कुत्र च विश्रामः ? सोदाहरणं प्रतिपादयत।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टादशः पाठः

स्त्रग्धरावृत्तपरिचयः

१८.१ स्त्रग्धरावृत्तस्वरूपम्

स्त्रग्धरावृत्ते	प्रतिपादं	- एकविंशत्यक्षराणि भवन्ति । - म (ऽऽऽ) र (ऽ।ऽ) भ (ऽ।।) न (।।।) य (।ऽऽ) य (।ऽऽ) य(।ऽऽ) गणानां प्रयोगः । - प्रतिसप्ताक्षरं विश्रामः ।

१८.२ स्त्रग्धरावृत्तलक्षणम्

यत्र प्रतिपादं क्रमेण म-र-भ-न-य-य-यगणानां प्रयोगः, प्रतिसप्ताक्षरञ्च विश्रामस्तद्वृत्तं स्त्रग्धरेति निगद्यते । तल्लक्षणं यथा -

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्त्रग्धरा कीर्तितेयम् ।

१८.३ उदाहरणं यथा

भ्रातः कस्त्वं तमाखुर्गमनमिह कुतो वारिधेः पूर्वपारात्
कस्य त्वं दण्डधारी न हि तव विदितं श्रीकलेरेव राज्ञः ।
चातुर्वर्ण्यं विधात्रा विविधविरचितं ब्रह्मणा धर्महेतो-
रेकीकर्तुं बलात्तन्निखिलजगति रे शासनादागतोऽस्मि ।।

अत्र प्रतिपादं क्रमेण म-र-भ-न-य-य-यगणानां प्रयोगः, प्रतिसप्ताक्षरं विश्रामश्च । अतः पद्यमिदं स्त्रग्धरावृत्तस्योदाहरणम् ।

१८.४ उदाहरणान्तराणि यथा

ख्यातः शक्रो भगाङ्को विधुरपि मलिनो माधवो गोपजातो
वेश्यापुत्रो वसिष्ठो रतिपतिरतनुः सर्वभक्षी हुताशः ।
व्यासो मत्स्योदरीयो लवणजलनिधिः पाण्डवा जारजाताः
रुद्रः प्रेतास्थिधारी त्रिभुवनविषये कस्य दोषो न चास्ति ।।१।।
प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतीजनकथामूकभावः परेषाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृष्णास्त्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्था ।।२।।
नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान्गुणान् ख्यापयन्तः
स्वार्थान्संपादयन्तो विततबहुतरारम्भयत्नाः परार्थे ।
क्षान्त्यैवाक्षेपरुक्षाक्षरमुखरमुखान् दुर्मुखान् दुःखयन्तः
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्थनीयाः ।।३।।

१८.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. स्रग्धरावृत्ते प्रतिपादं कत्यक्षराणि प्रयुज्यन्ते, कुत्र कुत्र च तत्र विश्रामः?
२. स्रग्धरावृत्तस्य किं लक्षणम्, किञ्च तस्योदाहरणम् ?
३. ख्यात० इति पद्ये स्रग्धरावृत्तस्य लक्षणं सङ्गमयत ।
४. सोदाहरणं निम्नपद्यांशस्याशयं प्रकाशयत ।
म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धराकीर्तितेयम् ।
५. प्राणाघातान्निवृत्तिः० नम्रत्वेनोन्नमन्त० इति पद्यद्वये कथं स्रग्धरालक्षणसङ्गतिः? स्फुटीकुरुत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकोनविंशः पाठः

सुन्दरीवृत्तपरिचयः

१९.१ सुन्दरीवृत्तस्वरूपम्

सुन्दरीवृत्ते	प्रथमतृतीयपादयोः	- दशाक्षराणि भवन्ति । - क्रमेण स (।।ऽ) स (।।ऽ) ज (।ऽ।) गणानामेकस्य गुरुवर्णस्य च प्रयोगः ।
	द्वितीयचतुर्थपादयोः	- एकादशाक्षराणि भवन्ति । - स (।।ऽ) भ (ऽ।।) र (ऽ।ऽ) गणानामेकस्य लघुवर्णस्यैकस्य गुरु-वर्णस्य च प्रयोगः ।

१९.२ सुन्दरीवृत्तलक्षणम्

यत्र प्रथमतृतीयपादयोः (अयुजोः) क्रमेण स-स-जगणानामेकस्य गुरुवर्णस्य, द्वितीयचतुर्थपादयोः (युजोः) स-भ-रगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगस्तद्वृत्तं सुन्दरी (वियोगिनी) इति निगद्यते । तल्लक्षणं यथा -

अयुजोर्यदि सौ जगौ युजोः, सभरा ल्गौ यदि सुन्दरी तदा

१९.३ उदाहरणं यथा

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा
अपि वागधिपस्य दुर्वचं
वचनं तद् विदधीत विष्मयम् ।

अत्र प्रथमतृतीयपादयोः क्रमेण सगणद्वयस्य, जगणस्य, एकस्य गुरुवर्णस्य च प्रयोगः । द्वितीयचतुर्थपादयोश्च क्रमशः सभरगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः । अतः पद्यमिदं सुन्दरीवृत्तस्योदाहरणम् ।

१९.४ उदाहरणान्तराणि यथा

परितोषयिता न कश्चन
स्वगतो यस्य गुणोऽस्ति देहिनः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परदोषकथाभिरल्पकः
स्वजनं तोषयितुं किलेच्छति ।।१।।
सहजान्धदृशः स्वदुर्नये
परदोषेक्षणदिव्यचक्षुषः ।
स्वगुणोच्चगिरो मुनिव्रताः
परवर्णग्रहणेष्वसाधवः ।।२।।
अपि वेत्ति षडक्षरणि चे-
दुपदेष्टुं शितिकण्ठमिच्छति ।
वसनाशनमात्रमस्ति चेद्
धनदादप्यतिरिच्यते खलः ।।३।।
द्विषतामपि साधु भाषितं
परिमोदं नयते कमप्यहो ।
सुहृदां मधुरं हितं वचः
किमिवामोदयते सचेतसः ।।४।।
प्रकटं मृदु नाम जल्पतः
परुषं सूचयतोऽर्थमन्तरा ।
शकुनादिव मार्गवर्तिभिः
पुरुषादुद्विजितव्यमिदृशात् ।।५।।

११.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. सुन्दरीवृत्तस्य किं लक्षणम्, किञ्च तस्योदाहरणम् ?
२. सुन्दरीवृत्ते कति गणाः प्रयुज्यन्ते ? निर्दिशत ।
३. सुन्दरीवृत्तलक्षणं परितोषयिता० इति पद्ये कथं सङ्गच्छते ? स्फुटीकुरुत।
४. सुन्दरीवृत्तमर्धसमपादवृत्तमिति सोदाहरणं प्रकाशयत ।
५. निम्नपद्यस्याशयं सोदाहरणं प्रदर्शयत ।

अयुजोर्यदि सौ जगौ युजोः सभरा ल्गौ यदि सुन्दरी तदा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विंशः पाठः

वृत्तोपस्थितितालिका

वृत्तनामानि	लक्षणसङ्केतः	उदाहरणसङ्केतः	वृत्तपरिचयः
आर्या	यस्याः पादे०	अज्ञः सुख०	प्रथमे, तृतीये च पादे द्वादशमात्राः द्वितीयेऽष्टादशमात्राः, चतुर्थे च पादे पञ्चदशमात्राः प्रयुज्यन्ते ।
अनुष्टुभ्	पञ्चमं लघु०	काव्यशास्त्र०	चतुर्षु पादेषु पञ्चमो वर्णः लघुः, षष्ठो वर्णश्च गुरुर्भवति। द्वितीयचतुर्थपादयोः सप्तमो वर्णः लघुर्भवति ।
उपजातिः	अनन्तरो०	अर्थागमो०	द्वयोर्वृत्तयोः (बहुधेन्द्रवज्रोपेन्द्रवज्रयोः) मिश्रणम् ।
रथोद्धता	रात्परैर्नर०	गम्यते यदि०	र-न-रगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रतिपादं क्रमेण प्रयोगः ।
शालिनी	मात्तौ गौ चेत्०	चित्ते भ्रान्ति०	प्रतिपादं क्रमेण म-त-तगणनां द्वयोर्गुरुवर्णयोश्च प्रयोगः । चतुर्थे तदनु सप्तमेऽक्षरे च विश्रामः ।
स्वागता	स्वागतेति०	कस्यचित् किमपि०	प्रतिपादं क्रमेण र-न-भगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः ।
दोधकम्	दोकमिच्छति०	देव! सदोध०	प्रतिपादं क्रमेण त्रयाणां भगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः ।
तोटकम्	वद तोटक०	मणिना वलयो०	प्रतिपादं चतुर्णां सगणानां प्रयोगः ।
द्रुतविलम्बितम्	द्रुतविलम्बित०	अलिरयं नलिनी०	प्रतिपादं क्रमेण न-भ-भ-रगणानां प्रयोगः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृत्तनामानि	लक्षणसङ्केतः	उदाहरणसङ्केतः	वृत्तपरिचयः
वंशस्थम्	वदन्ति वंशस्थ०	वरं वनं व्याघ्र०	प्रतिपादं क्रमेण ज-त-ज-रगणानां प्रयोगः ।
वसन्ततिलकम्	ज्ञेयं वसन्त०	निन्दन्तु नीति०	प्रतिपादं क्रमेण त-भ-ज-जगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः ।
मालिनी	ननमयय०	नरपतिहित०	प्रतिपादं क्रमेण ननमयय-गणानां प्रयोगः, अष्टमे तदनु सप्तमे चाक्षरे विश्रामः ।
मन्दाक्रान्ता	मन्दाक्रान्ताम्बुधि०	मौनान्मूक०	प्रतिपादं क्रमेण म-भ-न-त-तगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः। चतुर्थे तदनु षष्ठे ततः सप्तमे चाक्षरे विश्रामः ।
शिखरिणी	रसैरुद्रैश्छिन्ना०	नभो भूषा०	प्रतिपादं क्रमेण य-म-न-स-भगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः। षष्ठे तदनु चैकादशाक्षरे विश्रामः।
पृथ्वी	जसौ जस०	दुरन्तदनु०	प्रतिपादं ज-स-ज-स-यगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः । अष्टमे तदनु नवमे चाक्षरे विश्रामः ।
शार्दूलविक्रीडितम्	सूर्याश्वैर्मसज०	शक्यो वारवितुं०	प्रतिपादं क्रमेण म-स-ज-स-त-तगणानामेकस्य गुरुवर्णस्य च प्रयोगः, द्वादशे, तदनु सप्तमे चाक्षरे विश्रामः ।
स्रग्धरा	म्रभ्नैर्यानां०	भ्रातः कस्त्वं०	प्रतिपादं क्रमेण म-र-भ-न-य-य-यगणानां प्रयोगः, प्रतिसप्ताक्षरञ्च विश्रामः ।
सुन्दरी	अयुजो०	यदवोचत०	प्रथमतृतीयपादयोः त-त-ज-गणानामेकस्य गुरुवर्णस्य, द्वितीयचतुर्थपादयोः स-भ-रगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकविंशः पाठः

अलङ्कारः

२१.१ *अलङ्कारसामान्यलक्षणम्*

अलङ्करोतीति व्युत्पत्याऽलङ्कारशब्दो निष्पद्यते । लोके यथा शरीराऽलङ्कृतिसाधनानि कटककुण्डलहारकेयूरादीनि वस्तूनि, अलङ्कारशब्देनाभिधीयन्ते तथैव काव्येष्वपि काव्यशरीरशोभातिशायिनोऽनुप्रासोपमादयोऽलङ्कारपदेन व्यवह्रियन्ते। यथा लोकेऽलङ्कृता जना उत्कृष्टा मन्यन्ते, तथैव अलङ्कारैः समन्वितानि काव्यान्यपि समुत्कृष्टानि मन्यन्ते, सहृदयानां चेतश्चावर्जयन्ति । अलङ्कारस्य सामान्यलक्षणं यथाऽऽह दण्डी –

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते

अलङ्कारवादिनां मतेऽलङ्काराः काव्यस्य स्थिरा धर्माः, ध्वनिवादिनां मते तु नास्ति तेषां स्थिरधर्मत्वम्, तदेवाह साहित्यदर्पणकारो विश्वनाथः –

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिन

रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।

सर्वे काव्यशास्त्रिणः शब्दार्थौ शरीरं काव्यस्येति स्वीकुर्वन्ति । अलङ्काराश्च काव्यशरीरस्योत्कर्षाधायका इत्यत्र न कापि विप्रतिपत्तिः।अतः शब्दार्थयोरुत्कर्षाधायकत्वमलङ्कारत्वमिति अलङ्कारस्यास्ति सामान्यलक्षणम् ।

२१.२ *अलङ्कारमहत्त्वम्*

काव्येष्वलङ्काराणां महत्त्वमतीव गौरवमयं विद्यते । काव्यशास्त्रिषु केचन कथयन्ति यत् – अलङ्कारानन्तरेण काव्यस्य कल्पनम् तथैव निरर्थकं यथा उष्णतां विना वह्नेरस्तित्वस्य परिकल्पनम् । तथा चोक्तं जयदेवेन चन्द्रालोके –

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।

असौ न मन्यते कस्मादनुष्णमनलं कृती ।।

एवमेव –

अलङ्कारविहीना तु विधवेव सरस्वती ।

अलङ्कारवादिनां मते काव्योत्कर्षाधायकं तत्त्वम्, अलङ्कारा एव। तेषां स्थितिः काव्येऽपरिहार्या भवति । ध्वनिवादिनस्त्वलङ्कारान् काव्यस्यास्थिरधर्मत्वेनाङ्गीकुर्वन्ति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परं तेऽपि, अलङ्काराणां स्थितिं विच्छित्तिविशेषाधायकत्वेनैव स्वीकुर्वन्ति। यथाह मम्मटः –

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।

तेषां मते वाच्यतया स्थिता अलङ्काराः शब्दार्थद्वारा रसादीनुपकुर्वन्ति, व्यङ्ग्य-तया प्रयुक्ता अलङ्कारास्तु काव्यस्यात्मरूपेण अलङ्कारध्वनिरित्याख्यया भवन्ति व्यवदेश्याः । अत काव्ये सौन्दर्योत्कर्षाधायकतयाऽलङ्काराणामस्तित्वं स्वीकुर्वन्ति विद्वांसः ।

२१.३ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. अलङ्कारशब्दस्य का व्युत्पत्तिः, कश्च तस्यार्थः, कथञ्च काव्यशास्त्रे शब्दोऽयं प्रयुक्तः ?

२. अलङ्कारस्य किमस्ति सामान्यलक्षणम् ?

३. अलङ्कारविषयेऽलङ्कारवादिनां ध्वनिवादिनां चान्तरा किं पार्थक्यम्?

४. अधस्तनपद्यस्याशयं प्रकाशयत ।

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।।

५. काव्येष्वलङ्कारस्य किमस्ति महत्त्वम् ? ध्वनिवादिनामलङ्कारवादिनाञ्च मतं समीक्ष्य प्रकाशयत ।

६. निम्नपद्ययोराशयं विशदयत ।

क) अलङ्कारविहीना तु विधवेव सरस्वती

ख) अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती
असौ न मन्यते कस्मादनुष्णमनलं कृती

ग) उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वाविंशः पाठः

अलङ्कारप्रकारः

२२.१ *अलङ्कारस्य भेदाः*

सामान्यतयाऽलङ्कारस्य त्रयो भेदाः सन्ति । शब्दालङ्काराः, अर्थालङ्काराः, उभयालङ्काराश्च । ये काव्यगतशब्दानां सौन्दर्यं वर्धयन्त काव्यात्मरूपेणावस्थितान् रसादीनप्युपकुर्वते, ते शब्दालङ्कारा निगद्यन्ते । ते च शब्दपरिवृत्यसहा भवन्ति ।

२२.२ *शब्दालङ्काराः*

लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ।।

अत्र कुञ्जगुञ्जपुञ्जादिषु व्यञ्जनसाम्यमस्ति प्रयुक्तम्, वासन्तिकपवनस्य रतेरुद्दीपकतया शृङ्गारानुकूला वर्णाः सन्त्यत्र प्रयुक्ताः । अतोऽत्रानुप्रासालङ्कारः । कुञ्जगुञ्जादीनां परिवर्तनेऽनुप्रासाभावादत्र शब्दानां परिवृत्यसहत्वम् । एवमेव यमकादावपि बोध्यम् ।

२२.३ *अर्थालङ्काराः*

ये च पुनः काव्यात्मतत्त्वमुत्कर्षयन्तोऽर्थस्य सौन्दर्यं समेधयन्ति तेऽर्थालङ्काराः कथ्यन्ते । ते च शब्दपरिवृत्तिसहा भवन्ति ।

२२.४ *उदाहरणं यथा*

हरस्तु किञ्चित्परिलुप्तधैर्य -
श्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि ।।

अत्र शिवस्योपमेयस्याम्बुराशिनोपमानेन सह सादृश्यवर्णनादुपमालङ्कारः । अत्रोपमानोपमेयसाधारणधर्मवाचकशब्दानां पर्यायशब्दोपादानेऽपि, उपमालङ्कारे न कापि क्षतिरिति शब्दपरिवृत्तिसहत्त्वमस्येति वेद्यम् । शब्दपरिवृत्तिसहत्वासहत्वे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तूभयालङ्कारः ।

२२.५ *अर्थालङ्कारभेदाः*

अर्थालङ्काराश्च सप्तविधाः सन्ति –

सादृश्यमूलकाः – उपमारूपकोत्प्रेक्षादयः ।
विरोधमूलकाः – विरोधाभासविभावनादयः ।
शृङ्खलाबन्धमूलकाः – कारणमाला–सारप्रभृतयः ।
तर्कन्यायमूलकौ – काव्यालिङ्गम्, अनुमानञ्च ।
वाक्यन्यायमूलकाः – यथासङ्ख्यादय : ।
लोकन्यायमूलकाः – प्रत्यनीकप्रतीपादयः ।
गूढार्थप्रतीतिमूलकाः – सूक्ष्मव्याजोक्ति प्रभृतयश्च ।

अनेन ज्ञायते यत्– अर्थालङ्काराणां सङ्ख्या शब्दालङ्कारापेक्षया भूयसी वर्तते।

२२.६ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. अलङ्काराः कतिविधाः, के च ते ?
२. शब्दार्थालङ्कारयोः को भेदः ?
३. शब्दालङ्काराः शब्दपरिवर्तनं सहन्ते वा नेति सोदाहरणं प्रकाशयत।
४. अर्थालङ्काराणां शब्दपरिवृत्तिसहत्वं सोदाहरणं निरूपयत ।
५. अर्थालङ्काराः कतिविधाः, के च ते ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रयोविंशः पाठः

अनुप्रासपरिचयः

२३.१ *अनुप्रासस्य स्वरूपम्*

अयं शब्दालङ्कारः । अत्र व्यञ्जनवर्णानामावृत्तिर्भवति । रसाद्यनुगुणतया प्रकर्षेण आसश्च अनुप्रासशब्दार्थः ।

२३.२ *अनुप्रासलक्षणम्*

स्वरस्य साम्ये वैषम्ये वा यत्र शब्दानां (व्यञ्जनवर्णानाम्) ऽऽवृत्तिर्भवति सोऽनुप्रासालङ्कारः । तल्लक्षणं यथा –

अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ।

२३.३ *उदाहरणं यथा – स्वरसाम्ये*

लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ।।

अत्र कुञ्जगुञ्जपुञ्जेत्यादौ स्वरसाम्यसहितं व्यञ्जनसाम्यं विद्यते । अतोऽनुप्रासालङ्कारस्योदाहरणमिदं पद्यम् । *स्वरवैषम्ये*

आदाय वकुलगन्धानन्धीकुर्वन् पदेपदे भ्रमरान् ।
अयमेति मन्दमन्दं कावेरीवारिपावन पवनः ।।

अत्र गन्धानन्धीत्यादौ स्वरस्य वैषम्येऽपि व्यञ्जनसाम्यादनुप्रासः ।

२३.४ *उदाहरणान्तराणि यथा*

सुरसुरारिरसासुरसंस्तुता स्तुतिरतेतितरां नितरां तता ।
सुतरसा सुरसा सरतस्तिरोऽतति सुतस्य सृतेः सततातततः ।।१।।
मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मददलिभृता निभृताक्षरमुज्जगे ।।२।।
सैषा चलच्चन्द्रकिचक्रवाकचञ्चच्चकोराकुलकूलकच्छ-
स्वः सीमसोपानसदृक्तरङ्गाः गङ्गाप्रतिस्पर्धिपयाः पयोष्णी ।।३।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२३.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. अनुप्रासशब्दस्य का व्युत्पत्तिः, कश्च तस्यालङ्कारस्य परिचयः ?

२. अनुप्रासालङ्कारस्य किं सामान्यलक्षणम् ?

३. अनुप्रासस्य लक्षणे स्वरस्य वैषम्येऽपीति कथनस्य कोऽभिप्रायः ? सोदाहरणं प्रकाशयत ।

४. निम्नपद्यांशस्याशयं निर्दिशत ।

अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ।

५. मधुरया० इति पद्ये केषां वर्णानां सकृत्केषाञ्च वर्णानामसकृदावृत्तिः? उल्लिखत।

६. अनुप्रासः शब्दपरिवृत्यसहोऽलङ्कार इति सोदाहरणं प्रतिपादयत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्विंशः पाठः

यमकालङ्कारपरिचयः

२४.१ *यमकालङ्कारस्वरूपम्*

अयं शब्दालङ्कारः । अत्र तेनैव क्रमेण पदानामावृत्तिर्भवति । आवृत्तपदयोः किमपि सार्थकं किमपि निरर्थकं जायते ।

२४.२ *यमकस्य सामान्यलक्षणम्*

यत्र भिन्नार्थस्य स्वरव्यञ्जनसमूहस्य एकेनैव क्रमेणावृत्तिर्भवति तत्र यमकालङ्कारः। तल्लक्षणं यथाह विश्वनाथः –

सत्यर्थे पृथगर्थाया: स्वरव्यञ्जनसंहतेः
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ।

अत्र द्वयोरपि पदयोः क्वचित्सार्थकत्वम्, क्वचिन्निरर्थकत्वम्, क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वम् ।

२४.३ *उदाहरणं यथा*

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः ।

अत्र पलाश–पराग–लतान्त–सुरभिशब्दानां तेनैव क्रमेणावृत्तेर्यमकालङ्कारः। 'पलाश–पालश' इत्यत्र, सुरभिं सुरभिमित्यत्र च द्वयोरेव पदयोः सार्थकत्वम् । लतान्त–लतान्त इत्यत्र प्रथमस्य, पराग–पराग इत्यत्र च द्वितीयस्य निरर्थकत्वम् ।

२४.४ *उदाहरणान्तराणि यथा*

अयि नितम्बिनि ! तं विनिकेतनं
वनचरं स्मर मा स्मर मा वरम् ।
निवस मानिनि ! मानिनि मे गृहे
विलसता लस तालवने मया ।।१।।

लसति कामिनि कामिनि पूरुषे
मयि रतिर्न तपस्विनि तादृशे ।
हरति ते रतितेजितमन्मथो
विरहतापहतापसदं मनः ।।२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुतनु ! ते तनुते न गवेषणं
विरहितो रहितो दयया धवः
भज हृदा हृदयङ्गममाशरं
त्यज पुरा स्वधवीकृतमानवम् ।।३।।

२४.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. यमकालङ्कारस्य कः परिचयः ?
२. यमकस्य किमस्ति सामान्यलक्षणम्, अयि नितम्बिनीत्यादिपद्ये कथञ्च तस्य लक्षणसङ्गतिः ?
३. निम्नपद्यस्याशयं विस्तारयत ।

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहातेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ।।

४. यमकालङ्कारे, आवृत्तयोः पदयोः सार्थकत्वं निरर्थकत्वं वेति सोदाहरणं विमृशत ।
५. सुतनु ! ते इत्यत्र कथं यमकालङ्कारः ? सलक्षणं प्रकाशयत ।
६. यमकालङ्कारलक्षणे 'तेनैवावृत्तिः' इति कथनस्याशयं सोदाहरणं लिखत ।
७. तत्रैव 'सत्यर्थे' इत्यस्याभिप्रायं स्फुटं प्रकाशयत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चविंशः पाठः

श्लेषालङ्कारपरिचयः

२५.१ *श्लेषालङ्कारस्वरूपम्*

अयमपि शब्दालङ्कारः। अत्र एक एव नानार्थकः शब्दोऽनेकानर्थान् बोधयति। एकस्मिन्नेव पदेऽनेकार्थानां श्लेषणात् 'श्लेषः' इति व्युत्पत्तिः ।

२५.२ *श्लेषालङ्कारलक्षणम्*

यत्र श्लिष्टैः पदैरनेकार्थानामभिधानं भवति तत्र श्लेषालङ्कारः । तल्लक्षणं यथाऽऽह विश्वनाथः -

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते ।

२५.३ *उदाहरणं यथा*

प्रावृषं शरदञ्चापि बहुधाकाशहारिणीम्
विलोक्य नोत्सुकः कः स्यान्नरो नीरजसङ्गताम् ।

अत्र बहुधाकाशहारिणीम् नीरजसङ्गताम्; इति पदद्वयेन शरदो वर्षर्तोश्च वैशिष्ट्यरूपार्थद्वयबोधनात् श्लेषालङ्कारः । शरद् बहुधा आकाशमनोहरा, कमलयुता भवति, वर्षास्तु प्रायः काशपुष्पैर्मनोहराः, धूलिशून्याश्च । इत्थमेकेनैव शब्देनार्थ-द्वयाभिधानात् श्लेषः।

२५.४ *उदाहरणान्तराणि यथा*

सवृद्धबालाः कालेऽस्मिन् मुक्ताहारविभूषणाः ।
प्राप्ताः प्रीतिं पुरे पौरा वनेषु च तपस्विनः ।।१।।
लीलया मण्डलीकृत्य भुजङ्गान्धारयन् हरः ।
देयाद् देवो वराहश्च तुभ्यमभ्यधिकां श्रियम् ।।२।।
योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः ।
शतकोटिदतां बिभ्रद् विबुधेन्द्रः स राजते ।।३।।
कुर्वते स्वमुखेनैव बहुधान्यस्य खण्डनम् ।
नमः पतनशीलाय मुसलाय खलाय च ।।४।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२५.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. श्लेषशब्दस्य कोऽर्थः, कश्च तस्यालङ्कारस्य परिचयः ?

२. श्लेषालङ्कारस्य किं सामान्यलक्षणम् ? सोदाहरणं निर्दिशत ।

३. लीलयेति पद्ये कथं श्लेषालङ्कारलक्षणसङ्गतिः ?

४. निम्नपद्यभागस्याशयं सोदाहरणं प्रदर्शयत ।

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते ।

५. सवृद्धवालेति पद्ये कथं श्लेषालङ्कारः ? सलक्षणं निरूपयत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षड्विंशः पाठः

उपमालङ्कारपरिचयः

२६.१ *उपमालङ्कारस्वरूपम्*

अयमर्थालङ्कारः । अत्रोपमेयस्योपमानेन सह सादृश्यं वर्ण्यते । **उपमानम्, उपमेयः, साधारणधर्मः, सादृश्यवाचकशब्दश्चेति**, उपमायां चत्वारि तत्त्वानि । तेषु सर्वेषामुपादाने पूर्णोपमा, एकस्य, द्वयोः, त्रयाणां वानुपादाने लुप्तोपमा। उपमीयतेऽनयेति उपमाशब्दस्य व्युत्पत्तिः । सादृश्यमूलकोऽयमलङ्कारः ।

२६.२ *उपमायाः सामान्यलक्षणम्*

यत्रोपमेयस्योपमानेन प्रत्ययाव्ययतुल्यार्थसमासैः सादृश्यं वर्ण्यते सोपमेति निगद्यते। तल्लक्षणं यथाऽऽह वाग्भटः –

उपमानेन सादृश्यमुपमेयस्य यत्र सा
प्रत्ययाव्ययतुल्यार्थसमासैरुपमा मता ।

२६.३ *उदाहरणानि यथा*

गत्या विभ्रममन्दया प्रतिपदं या राजहंसायते
यस्याः पूर्णमृगाङ्कमण्डलमिव श्रीमत्सदैवाननम् ।
यस्याश्चानुकरोति नेत्रयुगलं नीलोत्पलानि श्रिया
तां कुन्दाग्रदतीं त्यजन् जिनपती राजिमतीं पातु वः ।।

अत्र चत्वार उपमालङ्काराः । तत्र 'राजहंसायते' इत्यत्र क्यङ्प्रत्ययेन, उपमेयभूताया राजिमत्या उपमानरूपिण्या राजहंस्या सह सादृश्यं वर्णितम् । द्वितीये पादे राजिमत्या आननस्योपमेयस्य मृगाङ्कमण्डलेनोपमानेन सह, इवेत्यव्ययपदेन सादृश्यमस्ति निरूपितम् । तृतीये च पादे 'अनुकरोति' इति तुल्यार्थबोधकपदेन नेत्रयुगलस्योपमेयस्य नीलोत्पलैरुपमानैः साम्यं प्रकाशितम्, कुन्दाग्रदतीमित्यत्र च कुन्दस्य अग्रा इव दन्ता यस्या इति विग्रहे समासेन दन्तानां कुन्दाग्रैः सादृश्यं विद्यते प्रतिपादितम् ।

इयञ्चोपमा द्विविधा – पूर्णा लुप्ता च । यत्र उपमानोपमेयसाधारणधर्मवाचक-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पदानामुपादानं तत्र पूर्णा । यथा –

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।

अत्र पार्वतीपरमेश्वरयोः (उपमेययोः) वागर्थाभ्यां (उपमानाभ्यां) संपृक्तत्वरूप-साधारणधर्मेण सादृश्यवर्णनादुपमालङ्कारः । तथा चात्र पार्वतीपरमेश्वरौ इत्युपमेय-पदम् । 'वागर्थौ' इत्युपमानबोधकशब्दः । संपृक्तत्वञ्च साधारणधर्मः, इवेति पदञ्चात्र सादृश्यवाचकशब्दः। इत्थमत्रोपमानोपमेयसाधारणधर्मसादृश्यवाचकपदानां चतुर्णा-मप्युपादानात्पूर्णोपमालङ्कारः ।

यत्र च पुनः उपमानोपमेयसाधारणधर्मसादृश्यवाचकपदानां मध्ये एकस्य, द्वयोः, त्रयाणां वाऽनुपादानन्तत्र लुप्तोपमालङ्कारः । यथा –

गजेन्द्रगमना श्यामा कोमला कोकिलस्वनाः ।
हंसवाणीप्रिया सेयं राजते मृगलोचना ।।

अत्र 'गजेन्द्रस्य गमनमिव मन्दं गमनं यस्याः सा **गजेन्द्रगमना**, कोकिलस्य स्वन इव मधुरः स्वनो यस्याः सा **कोकिलस्वना**, हंसस्य वाणीव मधुरा वाणी यस्याः सा, **हंसवाणी**, मृगस्य लोचने इव चञ्चले लोचने यस्याः सा **मृगलोचना**' इत्यत्र समासे प्रत्येकमुपमानसाधारणधर्मसादृश्यवाचकपदानां लोपाल्लुप्तोपमा-लङ्कारः। एकस्यैवोपमेयस्यानेकोपमानत्वे तु मालोपमालङ्कारः ।

२६.४ *उदाहरणान्तराणि यथा*

१. प्रत्ययैः सादृश्यकथने –

अन्तःपुरीयसि रणेषु सुतीयसि त्वं
पौरं जनं तव सदा रमणीयते श्रीः ।
दृष्टप्रियाभिरमृतद्युतिदर्शमिन्द्रः
सञ्चारमत्र भुवि सञ्चरसि क्षितीशः ।।
गाम्भीर्यगरिमा यस्य नित्यं गङ्गाभुजङ्गवत् ।
दुरालोकः स समरे निदाघाम्बररत्नवत् ।

२. इवयथाद्यैरव्ययपदैः सादृश्यवर्णने –

दुराराध्या हि राजानः पर्वता इव सर्वदा ।
व्यालाकीर्णाः सुविषमाः कठिना दुष्टसेविताः
द्विजिह्वाः क्रूरकर्माणोऽनिष्टाश्छिद्रानुसारिणः ।
दूरतोऽपि हि पश्यन्ति राजानो भुजगा इव ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

खलः कार्पण्यदोषेण दूरेणैव विसृज्यते ।
अपायशङ्किभिर्लोकैर्विषेणाशीविषो यथा ।।

३. तुल्यार्थवाचकशब्दैः समस्तैरसमस्तैर्वा सादृश्यविधाने -

असमस्तेन यथा -

प्राणापहरणेनासि तुल्यो हालाहलेन मे
शशाङ्कः केन मुग्धेन सुधांशुरिति भाषितः ।
आकृष्टकरवालोऽसौ संपराये परिभ्रमन्
प्रत्यर्थिसेनया दृष्टः कृतान्तेन समो नृपः ।।

समासेन सादृश्यप्रतिपादने -

तन्वङ्गी लोलनेत्रा नवकनकरुचिः पक्वविम्बाधरोष्ठी
सुभ्रूः शुद्धस्वभावा जलधररुचिरा चारुचन्द्राननश्रीः ।
नानाविद्याप्रपूर्णा परभृतवचना राजहंसप्रयाणा
सच्छीला सूक्ष्ममध्या किशलयचरणा रुक्मिणी रूपराशिः ।

२६.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. उपमाशब्दस्य को व्युत्पत्तिलभ्योऽर्थः, कश्च तस्यालङ्कारस्य परिचयः?
२. उपमालङ्कारस्य किं लक्षणम्, कतिविधश्च सः ?
३. उपमायाः प्रमुखतत्त्वानि कानि ?
४. अन्तपुरीयसी० इत्यत्र कथमुपमालङ्कारलक्षणसङ्गतिः ?
५. पूर्णोपमा-लुप्तोपमयोः को भेदः ? सोदाहरणं प्रकाशयत ।
६. प्रत्ययैः सादृश्यवर्णने त्रीणि कानिचिदुपमाया उदाहरणान्यन्विष्य लिखत ।
७. तुल्यार्थवाचकशब्दैः कथं सादृश्यं वर्ण्यते ? सम्यक् प्रकाशयत ।
८. निम्नशब्दानां पारिभाषिकमर्थं निर्दिशत ।
   (क) उपमानम् (ख) उपमेयः
   (ग) साधारणधर्मः (घ) सादृश्यवाचकशब्दः
९. निम्नलिखितसादृश्यवाचकपदानि प्रयुज्योपमालङ्कारमण्डितानि वाक्यानि रचयत ।

   इव, यथा, तुल्यः, सदृशः, उपमा, निभः, प्रतीकाशः, समः, आभा, सदृक्षः, सदृक्, समानः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तविंशः पाठः

उत्प्रेक्षालङ्कारपरिचयः

२७.१ *उत्प्रेक्षालङ्कारस्वरूपम्*

अर्थालङ्कारोऽयम् । अत्र वर्णनीयस्य (उपमेयस्य) अवर्णनीयेन (उपमानेन) सह गुणक्रियादिभिः संभावना वर्ण्यते । इव किम् ननु इत्यादयश्चात्र संभावनावाचकाः शब्दाः । वर्णनीयस्यावर्णनीयेनोत्प्रेक्ष्यते इति उत्प्रेक्षाशब्दस्य व्युत्पत्तिः ।

२७.२ *उत्प्रेक्षालङ्कारस्य सामान्यलक्षणम्*

यत्र प्रकृतस्य (वर्णनीयस्य, उपमेयस्य) समेन (अवर्णनीयेन, उपमानेन) यत् संभावनम्, तदेवोत्प्रेक्षालङ्कार इत्युच्यते । तल्लक्षणं यथाऽऽह दण्डी–

संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

२७.३ *उदाहरणं यथा*

पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम् ।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः ।।

अत्र वर्णनीयस्य तरङ्गाग्रकृतप्रेरणस्यावर्णनीयेन फेनचन्दनपेषणरूपेण संभावनादुत्प्रेक्षालङ्कारः । तथैव द्वितीयार्धे चन्द्रकिरणव्यापनस्य वर्णनीयस्य चन्द्रकृतदिगङ्गनालेपनकर्मत्वेन संभावनादुत्प्रेक्षालङ्कारः । उत्प्रेक्षावाचकाः शब्दास्तु –

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ।

२७.४ *उदाहरणान्तराणि यथा*

सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नूपुरमेकमुर्व्याम्
अदृश्यत त्वच्चरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम् ।।१।।
अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ।।२।।
सर्वोपमाद्रव्यसमुच्चयेन
यथा प्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्ना -
देकस्थसौन्दर्यदिदृक्षयैव ।।३।।
उन्मेषं यो मम न सहते जातवैरी निशाया
मिन्दोरिन्दिवरदलदृशा तस्य सौन्दर्यदर्पः ।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षा-
ल्लग्ना मन्ये ललिततनु ! ते पादयोः पादलक्ष्मीः ।।४।।
धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम् ।
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।।५।।
रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद् ध्रुवम् ।
त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी ।।६।।

२७.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. उत्प्रेक्षाशब्दस्य का व्युत्पत्तिः, कश्च तस्यालङ्कारस्य परिचयः ?
२. उत्प्रेक्षालङ्कारस्य किमस्ति सामान्यलक्षणम् ? सोदाहरणं प्रकाशयत।
३. उत्प्रेक्षाव्यञ्जका शब्दाः के सन्ति, सोदाहरणं निरूपयत ।
४. सैषा स्थली०, अस्त्युत्तरस्याम्० इति पद्यद्वये कथमुत्प्रेक्षालङ्कारलक्षणं सङ्गच्छते ? विमृशत ।
५. उत्प्रेक्षालङ्कारस्य कानिचिदन्यानि त्रीण्युदाहरणानि, अन्विष्य लिखत।
६. उत्प्रेक्षालङ्कारः शब्दपरिवृत्तिं सहते न वेति सोदाहरणं प्रकाशयत ।
७. उत्प्रेक्षालङ्कारविलसितानि कानिचिद् दशवाक्यानि लिखत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टाविंशः पाठः

रूपकालङ्कारपरिचयः

२८.१ *रूपकालङ्कारस्वरूपम्*

सादृश्यमूलकेष्वलङ्कारेष्वन्यतमोऽयं रूपकालङ्कारः । अत्र उपमानोपमेययोरभेदारोपो भवति । अलङ्कारेऽस्मिन्नुपमानोपमेययोरुपादानमत्यावश्यकम्। रूपयति- उपमानोपमेययोरभेदारोपं करोतीति रूपकम्, इत्यस्य व्युत्पत्तिः ।

२८.२ *रूपकालङ्कारलक्षणम्*

यत्रोपमानोपमेययोरभेदारोपस्तत्र रूपकालङ्कारः । तल्लक्षणं यथाह – मम्मटः–

तद्रूपकमभेदो य उपमानोपमेययोः

२८.३ *उदाहरणं यथा*

निशया धवलीकुर्वन् नुर्वीं सकुलपर्वताम् ।
निशाविलासकमलमुदेति स्म निशाकरः ।।

अत्रोपमेयोपमानयोर्निशाकरनिशाविलासकमलयोरभेदारोपाद् रूपकालङ्कारः।

२८.४ *उदाहरणान्तराणि यथा*

वाल्मीकिगिरिसंभूता रामसागरगामिनी
पुनाति भुवनं पुण्या रामायणमहानदी ।।१।।
श्लोकसारसमाकीर्णं सर्गकल्लोलसङ्कुलम् ।
काण्डग्राहमहामीनं वन्दे रामायणार्णवम् ।।२।।
अनेकविद्वज्जनपूर्णरत्नं
वेदोदकन्यायतरङ्गरम्यम् ।
अलङ्घनीयं गुरुतीर्थमेकं
सभासमुद्रं शिरसा नमामि ।।३।।

२८.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. रूपकशब्दस्य कोऽस्ति व्युत्पत्तिलभ्योऽर्थः ?
२. रूपकालङ्कारस्य सामान्यलक्षणं विलिख्योदाहरणे सङ्गमयत ।
३. अनेक० इत्यत्र कथं रूपकालङ्कारलक्षणसङ्गतिः ? स्फुटं प्रकाशयत।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऊनत्रिंशः पाठः

अतिशयोक्त्यलङ्कारपरिचयः

२९.१ *अतिशयोक्त्यलङ्कारस्वरूपम्*

अयमर्थालङ्कारः । अतिशयिता प्रसिद्धिमतिक्रान्ता उक्तिः, अतिशयोक्तिः, इत्यतिशयोक्तिपदस्य व्युत्पत्तिः । अत्र वर्णनीयस्य वस्तुन उत्कर्षं प्रतिपादयितुं लोकातिक्रान्तत्वेन वर्णनं विधीयते ।

२९.२ *अतिशयोत्त्यलङ्कारस्य सामान्यलक्षणम्*

यत्र वर्णनीयस्य वस्तुन उत्कर्षं प्रतिपादयितुं लोकातिक्रान्ततया वर्णनम्, तत्राति-शयोक्त्यलङ्कारः, तल्लक्षणं यथाह उद्भटः -

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्
मन्वतेऽतिशयोक्तिं तामलङ्कारतया बुधाः ।।

तत्र लोकातिक्रान्तत्वञ्च चतुर्विधम्, मम्मटेन विद्यते वर्णितम् ।

यत्रोपमेयं (वर्णनीयविषयं) निगीर्य तदभेदत्वेनोपमानस्य (विषयिणः) वर्णनं भवति तत् प्रथमम् ।

२९.३ *उदाहरणं यथा*

कमलमनम्भसि कमले च कुवलये तानि च कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ।

कश्चित् स्वप्रियां निरीक्ष्य तस्याः सखीं प्रति कथयति- कमलमिति । अत्र मुखादीनामुपमेयानां निगरणं विधाय तेषामभेदतयोपमानरूपाणां कमलादीनां वर्णनाद‌तिशयोक्त्यलङ्कारः ।

यत्रोपमेय एव तद्भिन्नतया वर्ण्यते, तद् द्वितीयं लोकातिक्रान्तत्वम् ।

२९.४ *उदाहरणं यथा*

अन्यदेवाङ्गलावण्यमन्याः सौरभसंपदः ।
अस्याः पद्मपलाशाक्ष्याः सरसत्वमलौकिकम् ।।

अन्यासु नायिकासु यज्जातीयं लावण्यादिकं तस्यामपि तज्जातीयमेव लावण्यादिकं वर्तते । परन्तु पद्येऽस्मिन् वर्णनीयस्य लावण्यादेस्तद्भिन्नतया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्णनादतिशयोक्तिः ।

यत्र चेदर्थबोधकैः पदैरसंभवार्थस्य कल्पनन्तत्र तृतीयं लोकातिक्रान्तत्वम्।

२९.५ *उदाहरणं यथा*

यदि स्यान्मण्डले सक्तमिन्दोरिन्दिवरद्वयम् ।
तदोपमीयते तस्या वदनं चारुलोचनम् ।।

अत्र यद्यर्थबलेन विषयस्योत्कर्षं प्रतिपादयितुमसंभवस्य इन्दोर्मण्डले कमलद्वयसंयोगरूपस्योपमानस्य कल्पनादतिशयोक्तिः ।

यत्र कारणस्य क्षिप्रकारित्वं वक्तुं कारणात्पूर्वं समकालमेव वा कार्यं वर्ण्यते तत्र चतुर्थं लोकातिक्रान्तत्वम् ।

२९.६ *उदाहरणं यथा*

अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ।

अथवा

आलिङ्गन्ति समं देव ! ज्यां शराश्च पराश्च ते ।

अत्र प्रथमे नायिकामानगमनरूपकार्यस्य नायकानुनयनरूपकारणाद् पूर्वमेव सिद्धकार्यकारणवैपरीत्येन वर्णनादतिशयोक्तिः । द्वितीये च पृथिव्यां शरपतन-शत्रुपतनयोः कार्यकारणयोः समकालिकत्वेन वर्णनादतिशयोक्त्यलङ्कारः ।

२९.७ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. अतिशयोक्तिशब्दस्य का व्युत्पत्तिः, कश्च तस्य व्युत्पत्तिलभ्योऽर्थः?

२. अतिशयोक्त्यलङ्कारस्य किं लक्षणम्, किञ्च तदुदाहरणम्, कथञ्चोदाहरणे लक्षणसमन्वयः ?

३. लोकातिक्रान्तत्वञ्च कतिविधम् ? सोदाहरणं प्रकाशयत ।

४. अतिशयोक्त्यलङ्कारस्य कति भेदाः, के च ते ?

५. निम्नपद्ये कथमतिशयोक्तिलक्षणसंगतिः ? स्फुटं प्रकाशयत ।

अन्येयं रूपसंपत्तिरन्या वैदग्ध्यघोरणी ।
नैषा नलिनपत्राक्षी सृष्टिः साधारणी विधेः ।

६. सोदाहरणं तात्पर्यं प्रकाशयत ।

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम् ।
मन्वतेऽतिशयोक्तिं तामलङ्कारतया बुधाः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रिंशः पाठः

अपह्नुत्यलङ्कारपरिचयः

३०.१ *अपह्नुत्यलङ्कारस्वरूपम्*

अर्थालङ्कारोऽयम् । अत्र वर्णनीयस्य (उपमेयस्य) निषेधं विधायावर्णनीयस्य (उपमानस्य) स्थापनं विधीयते । वास्तविकस्योपमेयस्यापह्नवादपह्नुतिरिति संज्ञा।

३०.२ *अपह्नुत्यलङ्कारलक्षणम्*

यत्र प्रकृतं (वर्णनीयम्, उपमेयम्) निषिध्य अन्यस्य (अप्रकृतस्य, अवर्णनीयस्य, उपमानस्य) स्थापनं विधीयते तत्रापह्नुत्यलङ्कारः । तल्लक्षणं यथा-

प्रकृतं प्रतिषिध्यान्यत्स्थापनं स्यादपह्नुतिः ।

३०.३ *उदाहरणं यथा*

नेदं नभोमण्डलमम्बुराशि-
नैताश्च तारा नवफेनभङ्गाः ।
नायं शशी कुण्डलीतः फणीन्द्रो
नासौ कलङ्कः शयितो मुरारिः ।।

अत्र प्रथमपादे प्रकृतं नभोमण्डलं निषिध्याप्रकृतस्याम्बुराशेः स्थापनम्, द्वितीये पादे वर्णनीयास्ताराः प्रतिषिध्यावर्णनीयस्य नवफेनभङ्गस्य स्थापनम्, तृतीये पादे प्रस्तुतं शशिनं निषिध्य फणीन्द्रस्य स्थापनम्, चतुर्थे च पादे कलङ्कं प्रतिषिध्य शयानस्य मुरारेः स्थापनम् । अतः पद्येऽस्मिन् वर्णनीयविषयान् निषिध्यावर्णनीयविषयाणां स्थापनादपह्नुत्यलङ्कारः।

३०.४ *उदाहरणान्तराणि यथा*

अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे
सारङ्गं कतिचिच्च संजगदिरे भूच्छायमैच्छन् परे ।
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते
तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे ।।१।।
जटा नेयं वेणीकृतकचकलापो न गरलं
गले कस्तूरीयं शिरसि शशिलेखा न कुसुमम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इयं भूतिर्नाङ्गे प्रियविरहजन्मा धवलिमा
पुरारातिभ्रान्त्या कुसुमशर ! मां किं प्रहरसि ।।२।।

सरोजमेतन्मुखकैतवाश्रितं
मधुव्रतौ लोचनरूपधारिणौ ।
तिलप्रसूनं किल नासिकात्मना
स्थितं मृणालञ्च भुजच्छलादिदम् ।।३।।

३०.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. अपह्नुतिशब्दस्य कोऽस्ति व्युत्पत्तिलभ्योऽर्थः, कश्चापह्नुत्यलङ्कारस्य परिचयः?
२. अपह्नुत्यलङ्कारस्य किं सामान्यलक्षणम् ? सोदाहरणं प्रकाशयत ।
३. अङ्कं केऽपीत्यत्रापह्नुतिलक्षणं कथं सङ्गच्छते ?
४. अपह्नुत्यलङ्कारस्य सामान्यलक्षणं विलिख्य सरोजमित्यादिपद्ये कथं लक्षण-सङ्गतिः ? विमृशत ।
५. निम्नपद्यस्याशयं सोदाहरणं स्फुटं प्रदर्शयत ।
प्रकृतं प्रतिषिध्यान्यत्स्थापनं स्यादपह्नुतिः ।
नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम् ।।
६. अपह्नुत्यलङ्कारमण्डितानि कानिचिद् दशवाक्यानि लिखत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकत्रिंशः पाठः

दीपकालङ्कारपरिचयः

३१.१ *दीपकालङ्कारस्वरूपम्*

अर्थालङ्कारोऽयम् । अलङ्कारेऽस्मिन् प्रस्तुतस्य, अप्रस्तुतस्य चार्थस्यैक-धर्माभिसम्बन्धो भवति। यदि कारकमेकमनेकासु क्रियासु संबद्धं भवेत्तदपि दीपकमेव। दीपयति प्रस्तुतेन सहैवाप्रस्तुतमप्यर्थं बुद्धावभासयतीति दीपकम्' इति दीपकशब्दार्थः। अथवा दीप इवेति दीपकम् । यथा द्वाःस्थो दीपोऽन्तर्वहिश्च प्रकाशयति तथैवा-लङ्कारोऽयं प्रस्तुतमप्रस्तुतञ्चार्थं बोधयति ।

३१.२ *दीपकालङ्कारलक्षणम्*

यत्र प्रस्तुतस्य (वर्णनीयस्य) अप्रस्तुतस्य (अवर्णनीयस्य) चार्थस्यैकधर्मेण क्रियैकेन वा सम्बन्धो वर्ण्यते तत्र दीपकालङ्कारः । यद्येकं कारकमनेकक्रियान्वितं भवति तत्राप्ययमेवालङ्कारः । तल्लक्षणं यथा -

अप्रस्तुताप्रस्तुतयोर्दीपकन्तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ।।

३१.३ *उदाहरणं यथा*

बलावलेपादधुनापि पूर्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा ।
सती च योषित् प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ।।

अत्र प्राकरणिकनिश्चलप्रकृतेरप्राकरणिकसत्या योषितश्च प्रतिजन्म पुरुषानुसरण-रूपधर्मैकसम्बन्धाद् दीपकालङ्कारः । यदि कारकमेकमनेकासु क्रियासु समन्वेति तत्रापि दीपकालङ्कारः ।

३१.४ *उदाहरणं यथा*

नृत्यन्ति जल्पन्ति हसन्ति रामाः
क्रीडन्ति गायन्ति चरन्ति वामाः ।
दीव्यन्ति दिव्यैः कुतुकैश्च दिव्याः
लङ्कागृहाट्टालकमाश्रयन्त्यः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र प्रथमपादे 'रामाः' इति कर्तृकारकेण नर्तनजल्पनहसनक्रियाणाम्, द्वितीये च पादे 'वामाः' इति कर्तृकारकेण क्रीडन–गान–चरणक्रियाणामन्वयाद् दीपकालङ्कारः।

३१.५ *उदाहरणान्तराणि यथा*

मृतस्य लिप्सा कृपणस्य दित्सा
विमार्गगायाश्च रुचिः स्वकान्ते ।
सर्पस्य शान्तिः कुटिलस्य मैत्री
विधातृसृष्टौ न हि दृष्टपूर्वा ।।१।।

अमृतस्य चन्द्रिकायाः
ललितायाश्चापि कवितायाः ।
सुजनस्य च निर्माणं
जनयति न हि कस्य सन्तोषम् ।।२।।

वासयति हीनसत्वा-
नतिसत्वानुद्धतान् विवासयति ।
त्रासयति सकलशत्रू-
न्नीतिविदामग्रणीर्नराधिपतिः ।।३।।

३१.६ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. दीपकमित्यस्य का व्युत्पत्तिः, कश्च तस्यार्थः ?
२. दीपकालङ्कारस्य परिचयः कः ?
३. दीपकालङ्कारस्य किमस्ति सामान्यलक्षणम्, कथञ्च लक्ष्ये तल्लक्षणसङ्गतिः?
४. मृतस्य लिप्सा० अमृतस्य० वासयति० इति पद्यत्रये दीपकालङ्कारलक्षणं कथं सङ्गच्छते ? निरूपयत ।
५. सोदाहरणमाशयं प्रकाशत ।

अप्रस्तुताप्रस्तुतयोर्दीपकन्तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ।।

६. दीपकालङ्कारमण्डितानि कानिचिद् दशवाक्यानि लिखत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वात्रिंशः पाठः

समासोक्त्यलङ्कारपरिचयः

३२.१ *समासोक्त्यलङ्कारस्वरूपम्*

अर्थालङ्कारोऽयम् । अत्र वर्णनीये विषयेऽवर्णनीयस्य विषयस्य व्यवहारारोपः। समासेन = एकोच्चारणरूपसङ्क्षेपेण, उक्तिः = प्रस्तुताप्रस्तुतयोरभिधानं समासोक्तिरिति शब्दार्थः ।

३२.२ *समासोक्त्यलङ्कारलक्षणम्*

यत्र प्रस्तुते (वर्णनीये) विषयेऽप्रस्तुतविषयस्य (अवर्णनीयस्य) व्यवहारसमारोपस्तत्र समासोक्त्यलङ्कारः । तल्लक्षणं यथा -

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य यत् ।

३२.३ *उदाहरणं यथा*

ललिततरतरङ्गैः रत्नभूषां गृहीत्वा
पतिरपि सरितां कं दर्पचिह्नं दधानः ।
प्रसरति तटिनीनां सङ्गमायेव तासां
मुखरसमपि लेढुं तत्र लङ्कागतानाम् ।।

अत्र नदीसमुद्रसङ्गमवर्णनेन प्रस्तुतार्थेनाप्रस्तुतस्य नायिकानायकसङ्गमव्यवहारप्रतीतेः समासोक्त्यलङ्कारः ।

३२.४ *उदाहरणान्तराणि यथा*

कादम्बरी भगवती मदिरायताक्षी
नित्यं मदीयहृदये वसति प्रसन्ना ।
आलिङ्ग्य मां नयति खे मुहुरेकदा सा
भूमौ निपातयति मां ससुखं शयेऽहम् ।।१।।
आगत्य संप्रति वियोगविसंस्थुलाङ्गी-
मम्भोजिनीं क्वचिदपि क्षपितत्रियामः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतां प्रसादयति पश्य शनैः प्रभाते
तन्वङ्गि पादपतनेन सहस्ररश्मिः ।।२।।
उदयशिखरिशृङ्गप्राङ्गणेष्वेव रिङ्गन्
सकलमुखसहासं वीक्षितः पद्मिनीभिः ।
विततमृदुकराग्रः शब्दयन्त्या वयोभिः
परिपतति दिवोऽङ्के हेलया बालसूर्यः ।।३।।

३२.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. समासोक्तिपदस्य का व्युत्पत्तिः, कश्च तस्यालङ्कारस्य परिचयः ?
२. समासोक्त्यलङ्कारस्य सामान्यलक्षणं विलिख्य लक्ष्ये सङ्गतिं प्रदर्शयत ।
३. निम्नपङ्क्तेराशयं सोदाहरणं प्रकाशयत ।
समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य यत् ।
४. असमाप्तजिगीषस्येत्यत्र समासोक्त्यलङ्कारस्य लक्षणं कथं सङ्गच्छते? स्फुटीकुरुत ।
५. समासोक्त्यलङ्कारस्य कः परिचयः ? सोदाहरणं निरूपयत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रयस्त्रिंशः पाठः

दृष्टान्तालङ्कारपरिचयः

३३.१ *दृष्टान्तालङ्कारस्वरूपम्*

गम्यौपम्योऽयमलङ्कारः अत्र वाक्यद्वयं प्रयुज्यते - उपमेयवाक्यमुपमानवाक्यञ्च । तच्च परस्परं निरपेक्षं भवति । अलङ्कारेऽस्मिन् भिन्नवाक्यगतयोः समानधर्मयोर्भिन्नधर्मयोर्वा प्रकृताप्रकृतविषययोर्विम्बप्रतिविम्बभावः । दृष्टः (अवगतः) अन्तः (समर्थनीये समर्थकस्य स्वरूपं सादृश्यम्) यस्मिन् स इति दृष्टान्तशब्दस्य व्युत्पत्तिः ।

३३.२ *दृष्टान्तालङ्कारस्य सामान्यलक्षणम्*

यत्र भिन्नवाक्यगतयोः समानधर्मयोर्भिन्नधर्मयोर्वा प्रकृताप्रकृतविषययोर्विम्बप्रतिविम्बभावस्तत्र दृष्टान्तालङ्कारः । तल्लक्षणं यथा

चेद् विम्बप्रतिविम्बत्वं दृष्टान्तस्तदलङ्कृतिः

३३.३ *उदाहरणं यथा*

त्वमेव कीर्तिमान् राजन् विधुरेव हि कान्तिमान्

अत्र भिन्नधर्मयोः (कीर्ति-कान्तिमतोः) नृपचन्द्रयोः प्रकृताप्रकृतयोर्विम्बप्रतिविम्बभावाद् दृष्टान्तालङ्कारः ।

३३.४ *उदाहरणान्तराणि यथा*

१. **देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं**
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः।
अब्धिर्लङ्घित एव वानरभटैः किन्त्वस्य गम्भीरता
मापातालनिमग्नपीवरतनुर्जानाति मन्थाचलः ।।

२. **कामं नृपाः सन्ति सहस्रोऽन्ये**
राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३. अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधारम्
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ।।

३३.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. दृष्टान्तशब्दस्य का व्युत्पत्तिः, कश्च तस्यालङ्कारस्य परिचयः ?
२. दृष्टान्तालङ्कारस्य किं लक्षणम् ? सोदाहरणं प्रकाशयत ।
३. देवी वाचम्० कामं नृपा०, अविदित० इत्यत्र कथं दृष्टान्तालङ्कारः सङ्गच्छते? सलक्षणं निरूपयत ।
४. सोदाहरणमाशयं स्फुटीकुरुत ।

चेद् विम्बप्रतिविम्बत्वं दृष्टान्तस्तदलङ्कृतिः ।

५. दृष्टान्तालङ्कारलसितानि कानिचिद् दशवाक्यानि लिखत ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुस्त्रिंशः पाठः

स्वभावोक्त्यलङ्कारपरिचयः

३४.१ *स्वभावोक्त्यलङ्कारस्वरूपम्*

स्वभावस्योक्तिर्यस्मिन्निति स्वभावोक्तिपदस्य व्युत्पत्तिः । अत्र शिशुपशुपक्षिप्रभृतीनां तद्गतचेष्टाकारयोर्वर्णनं भवति ।

३४.२ *स्वभावोक्त्यलङ्कारलक्षणम्*

यत्र शिशुपशुपक्षिप्रभृतीनां स्वभावस्य वर्णनं विधीयते तत्र स्वभावोक्त्यलङ्कारः। तल्लक्षणं यथा –

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ।

३४.३ *उदाहरणं यथा*

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
शष्पैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।।

अत्र भयेनोत्प्लुत्य धावतो मृगस्य स्वभावोऽस्ति वर्णितः । अतः स्वभावोक्त्यलङ्कारः।

३४.४ *उदाहरणान्तराणि यथा*

पश्चादङ्घ्री प्रसार्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चैः-
रासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय ।
घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो
मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेण ।।१।।

लाङ्गूलेनाभिहत्य क्षितितलमसकृद् दारयन्नग्रपद्भ्या-
मात्मन्येवावलीय द्रुतमथ गगनं प्रोत्पतन् विक्रमेण ।
स्फूर्जद्धुंकारघोषः प्रतिदिशमखिलान् द्रावयन्नेष जन्तून्
कोपाविष्टः प्रविष्टः प्रतिवनमरुणोच्छूनचक्षुस्तरक्षुः ।।२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गर्जित्वा मेघधीरं प्रथममथ शनैर्मण्डलीकृत्य देहं
शृङ्गाभ्यां भीषयन्तावभिमुखमवनीं दारयन्तौ खुराग्रैः ।
मन्दं मन्दं समेत्य स्थिरनिहितपदं दत्तघातौ सरोषं
युध्येते चालयन्तौ कुटिलितमसकृत्पुच्छमेतौ महोक्षौ ।।३।।

३४.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. स्वभावोक्तिशब्दस्य व्युत्पत्तिं प्रदर्शयत ।
२. स्वभावोक्त्यलङ्कारस्य लक्षणमुदाहरणे सङ्गमयत ।
३. पश्चादङ्घ्रीत्यादौ स्वभावोक्तिलक्षणं कथं सङ्गच्छते ? प्रकाशयत ।
४. लाङ्गूलेनेत्यादौ कथं स्वभावोक्तिः ? सलक्षणं निरूपयत ।
५. सोदाहरणं प्रकाशयत ।

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पञ्चत्रिंशः पाठः

अर्थान्तरन्यासालङ्कारपरिचयः

३५.१ *अर्थान्तरन्यासालङ्कारस्वरूपम्*

वर्णितस्यार्थस्य समर्थनायार्थान्तरस्य (प्रस्तुतेतरार्थस्य) न्यासः (स्थापनम्) अर्थान्तरन्यासः । अत्र सामान्यार्थो विशेषार्थेन, विशेषार्थो सामान्यार्थेन, च समर्थ्यते।

३५.२ *अर्थान्तरन्यासस्य सामान्यलक्षणम्*

यत्र सामान्यार्थो विशेषार्थेन, विशेषार्थश्च सामान्यार्थेन समर्थ्यते तत्रार्थान्तर-न्यासालङ्कारः । तल्लक्षणं यथा -

उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः ।

३५.३ *उदाहरणं यथा*

हनुमानब्धिमतरद्दुष्करं किं महात्मनाम् ।

अत्र विशेषार्थस्य सामान्यार्थेन समर्थनादर्थान्तरन्यासः । सामान्यस्यार्थस्य विशेषार्थेन समर्थनस्योदाहरणं यथा -

गुणवद्वस्तु संसर्गाद्याति स्वल्पोऽपि गौरवम्,
पुष्पमालानुषङ्गेण पुष्पं शिरसि धार्यते ।

अत्र पूर्वार्धे वर्णितस्य सामान्यार्थस्योत्तरार्धे वर्णितेन विशेषार्थेन समर्थना-दर्थान्तरन्यासः ।

३५.४ *उदाहरणान्तराणि यथा*

उपकारमेव कुरुते विपद्गतः सद्गुणो नितराम् ।
मूर्छां गतो मृतो वा रोगानपहरति पारदः सकलान् ।।१।।
अहन्नेको रणे रामो यातुधानाननेकशः ।
असहाया महात्मानो यान्ति काञ्चन वीरताम् ।।२।।
कस्तृप्येन्मार्मिकस्तन्वि ! रमणीयेषु वस्तुषु ।
हित्वान्तिकं सरोजिन्याः पश्य याति न षट्पदः ।।३।।
सहसा विदधीत नक्रिया-
मविवेकः परमापदां पदम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृणुते हि विमृश्य कारिणं

गुणलुब्धा स्वयमेव संपदः ।।४।।

३५.४ *निम्नप्रश्नानामुत्तराणि लिखत*

१. अर्थान्तरन्यासशब्दस्य व्युत्पत्तिं प्रदर्श्य तदर्थञ्च लिखत ।

२. अर्थान्तरन्यासालङ्कारस्य लक्षणमुदाहरणे सङ्गमयत ।

३. अर्थान्तरन्यासालङ्कारस्य परिचयं सोदाहरणं प्रकाशयत ।

४. उपकारेमेव कुरुते० इत्यत्र कथमर्थान्तरन्यासः ? सलक्षणं प्रकाशयत।

५. अर्थान्तरन्यासालङ्कारयुतानि कानिचिद् दशवाक्यानि लिखत ।

६. सोदाहरणमाशयं स्फुटीकुरुत ।

उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षट्त्रिंशः पाठः

परिसङ्ख्यालङ्कारपरिचयः

३६.१ *परिसङ्ख्यालङ्कारस्वरूपम्*

अत्रैकस्मिन् कस्यापि विषयस्यास्तित्वं निराकृत्यापरस्मिन् तत् स्थाप्यते । परिशब्दस्य वर्जनार्थकतया सङ्ख्याशब्दस्य च ज्ञानार्थकतया परिसङ्ख्याशब्देन कथितसदृशस्य वर्जनबुद्धिरित्यर्थो बोध्यते ।

३६.२ *परिसङ्ख्यालङ्कारस्य लक्षणम्*

यत्रैकस्मिन् कस्यापि विषयस्यास्तित्वं निराकृत्यापरस्मिन् तत् स्थाप्यते तत्र परिसङ्ख्यालङ्कारः । तल्लक्षणं यथा –

परिसङ्ख्या निषिध्यैकमेकस्मिन् वस्तुयन्त्रणम् ।

३६.३ *परिसङ्ख्याभेदाः*

इयञ्च परिसङ्ख्या द्विविधा – शुद्धा, प्रश्नपूर्विका च । पुनः सा द्विविधा- शाब्दी आर्थी च । इत्थमियं चतुर्विधा ।

३६.४ *शुद्धायाः शाब्द्या उदाहरणं यथा*

स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवाम् ।

अत्र स्नेहक्षयशब्दः श्लिष्टः, तैलभावप्रेमनाशरूपद्वयार्थावगतेः । तथा चात्र स्नेहक्षयस्य (प्रेमाभावस्य) अस्तित्वं कामिनीषु निराकृत्य तस्य (तैलाभावस्य) अस्तित्वं प्रदीपेषु स्थापितम्। अत्र प्रश्नाभावात् शुद्धा, नशब्दस्योपादानाच्च शाब्दी।

३६.५ *आर्थ्याः शुद्धाया उदाहरणं यथा*

विलङ्घयन्ति श्रुतिवर्त्म यस्यां
लीलावतीनां नयनोत्पलानि ।
बिभर्ति यस्यामपि वक्रिमाण –
मेको महाकालजटार्धचन्द्रः ।।

अत्र लीलावतीनां नयनोत्पलानि श्रुतिवर्त्म लङ्घयन्ति स्म (कर्णौ स्पृशन्ति स्म) न तु कोऽपि वेदमार्गम्, शिवमौलिस्थश्चन्द्र एव वक्रिमाणं (वक्रभावं) धारयति न तु जनाः कुटिलतां धारयन्तीति प्रतीतिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथा चात्र श्रुतिवर्त्मलङ्घनस्यास्तित्वं लीलावतीनां नयनेषु, निषिध्य हरजटाचन्द्रे स्थापनात् परिसङ्ख्यालङ्कारः । उज्जयनीस्थजनेषु कोऽपि वेदमार्गस्य लङ्घयिता नासीत्, न च तत्र कुटिला जना आसन्, इत्यर्थत एव प्रतीतेः (साक्षात् निषेधार्थक-शब्दस्यानुपादानात्) आर्थी । प्रश्नाभावेन चेयं शुद्धा परिसङ्ख्या ।

३६.६ *प्रश्नपूर्विकायाः शाब्द्या उदाहरणं यथा*

किं भूषणं सुदृढमत्र यशो न रत्नं
किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ।।

अत्र प्रश्नपूर्वकं रत्नादिषु भूषणत्वादीनां स्थितिं निराकृत्य यशःप्रभृतिषु स्थापनात् प्रश्नपूर्विका परिसङ्ख्या, निषेधार्थकशब्दस्योपादानाच्च शाब्दी ।

३६.७ *प्रश्नपूर्विकाया आर्थ्यास्तस्या उदाहरणं यथा*

किमासेव्यं पुंसां सविधमनवद्यं द्युसरितः
किमेकान्ते ध्येयं चरणयुगलं कौस्तुभभृतः ।
किमाराध्यं पुण्यं किमभिलषणीयञ्च करुणा
यदासक्त्या चेतो निरवधि विमुक्त्यै प्रभवति ।।

अत्र प्रश्नपूर्वकं निषेधार्थकशब्दस्य प्रयोगं विनैवान्यत्र सेव्यत्वादिकमर्थतो निरस्य गङ्गादिषु तस्य स्थापनात् परिसङ्ख्यालङ्कारः । अत इयं परिसङ्ख्या प्रश्नपूर्विका आर्थीति बोध्यम् ।

३६.८ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. परिसङ्ख्याशब्दस्य कोऽर्थः, कश्च तस्यालङ्कारस्य परिचयः ?
२. परिसङ्ख्यालङ्कारस्य किं लक्षणम्, के च तद्भेदाः ?
३. परिसङ्ख्यालङ्कारस्य लक्षणमुदाहरणे कथं सङ्गच्छते ?
४. विलङ्घयन्तीत्यत्यत्र कथं परिसङ्ख्यालङ्कारः ? सलक्षणं स्फुटीकुरुत।
५. निम्नपद्यभागस्याशयं निरूपयत ।

परिसङ्ख्या निषिध्यैकमेकस्मिन् वस्तुयन्त्रणम् ।
स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवाम् ।

६. निम्नगद्यांशयोः कथं परिसङ्ख्यालङ्कारः सङ्गच्छते ? विमृशत ।
क) यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसंकराः, छत्रेषु कनकदण्डा न प्रजानामासन् ।
ख) यस्य च अन्तःपुरिकाकुन्तलेषु भङ्गः, नूपुरेषु मुखरता अभूत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तत्रिंशः पाठः

विरोधाभासालङ्कारपरिचयः

३७.१ *विरोधाभासालङ्कारस्वरूपम्*

अयं विरोधमूलकोऽलङ्कारः । अत्र आपतत एव विरोधः प्रतीयते, सम्यक्तया परिशीलने तु विरोधस्य परिहारो जायते । अस्मिन्नलङ्कारे अपीति शब्देन विरोधो द्योत्यते। प्रायेणायमलङ्कारः श्लेषानुप्राणितो भवति । विरोध इव आभासते, इति विरोधाभासः, इत्यस्य व्युत्पत्तिः ।

३७.२ *विरोधाभासस्य सामान्यलक्षणम्*

यत्रापाततो विरोधः प्रतीयते, कृते चानुशीलने पश्चाद् विरोधस्य परिहारो भवति, स विरोधाभासालङ्कारः । तल्लक्षणं यथा –

आभासत्वे विरोधस्य विरोधाभास इष्यते ।

३७.३ *उदाहरणं यथा*

सदूषणापि निर्दोषा सखराऽपि सुकोमला
नमस्तस्मै कृता येन रम्या रामायणी कथा

अत्र आपाततः श्रवणे सदूषणाः= दोषयुक्ताऽपि, निर्दोषा= दोषरहिता, सखरा= सरुक्षाऽपि, सुकोमला = मृदुलेति विरोधः प्रतीयते । अनुशीलने तु खरदूषणयोः राक्षसयोः प्रतीतेर्विरोधपरिहारः । अतोऽत्र विरोधाभासालङ्कारः ।

३७.४ *उदाहरणान्तराणि यथा*

ब्रह्मण्योऽपि ब्रह्मवित्तापहारी
स्त्रीयुक्तोऽपि प्रायशो विप्रयुक्तः ।
सद्वेषोऽपि द्वेषनिर्मुक्तचेताः
को वा तादृक्दृश्यते श्रूयते वा ।।१।।
नक्षत्रभूः क्षत्त्रकुलप्रसूति-
र्युक्तो नभोगैः खलु भोगभाजः ।
सुजातरूपोऽपि न याति यस्य
समानतां काञ्चन काञ्चनाद्रिः ।।२।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जगद्योनिनरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ।।३।।

३७.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. विरोधाभास इति पदस्य का व्युत्पत्तिः, कश्च तस्यार्थः ?
२. विरोधाभासालङ्कारस्य कः परिचयः ? सोदाहरणं लिखत ।
३. विरोधाभासस्य किं लक्षणम् ? किञ्च तस्योदाहरणम् ? स्फुटं प्रकाशयत ।
४. ब्रह्मण्योऽपीत्यत्र कथं विरोधाभासालङ्कारः ? सलक्षणं निरूपयत।
५. सोदाहरणं निम्नपद्यभागस्याशयं प्रदर्शयत ।

आभासत्वे विरोधस्य विरोधाभास इष्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अष्टत्रिंशः पाठः

संसृष्ट्यलङ्कारपरिचयः

३८.१ *संसृष्टिसङ्करालङ्कारस्वरूपम्*

अत्र उपमाद्या अलङ्काराः परस्परं मिश्रिताः पृथगेव चारुत्वमुत्पादयन्ति । अतः संसृष्टिः, सङ्करश्चेति पृथगलङ्कारौ उच्येते । तदुक्तम् –

यद्येत एवालङ्काराः परस्परविमिश्रिताः ।
तदा पृथगलङ्कारौ संसृष्टिः सङ्करस्तथा ।।

३८.२ *संसृष्ट्यलङ्कारलक्षणम्*

यत्र परस्परं निरपेक्षतयाऽलङ्काराणां मिश्रणं भवति, तत्र तिलतण्डुलन्यायेन संसृष्टिरित्यलङ्कारः । तल्लक्षणं यथा –

मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते ।

३८.३ *उदाहरणं यथा –*

देवः पायादपायान्नः स्मेरेन्दीवरलोचनः ।
संसारध्वान्तविध्वंसहंसः कान्तिनिषूदनः ।

अत्र पूर्वार्धे पायादपायादित्यत्र यमकम्, संसार इत्यादौ सकारधकारयोरावृत्तेरनुप्रासः। इत्थञ्चात्र तयोः संसृष्टिः । द्वितीये पादे इन्दिवरे इव लोचने यस्य स इति उपमालङ्कारः । द्वितीयार्धे च कृष्णस्य हंसत्वेनाभेदारोपाद् रूपकम् । इत्थञ्चात्रोपमारूपकयोरर्थालङ्कारयोः संसृष्टिः ।

३८.४ *उदाहरणान्तराणि यथा*

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ।।१।।
वदनसौरभलोभपरिभ्रमद्-
भ्रमरसंभ्रमसंभृतशोभया ।
चलितया विदधे कलमेखला-
कलकलोलकलोलदृशान्यया ।।२।।
कुर्वन्ति केलिकलहं कलहंससङ्घा
नीरे नदन्ति सकलं विकलङ्कशङ्काः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

खे वान्ति शीतमरुतो मरुतोयदानं
कृत्वाऽऽगता इव शिवो भवतोऽस्तु पन्थाः ।।३।।

३८.५ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. संसृष्ट्यलङ्कारस्य परिचयं दत्त ।
२. संसृष्ट्यलङ्कारस्य लक्षणं सोदाहरणं निरूपयत ।
३. लिम्पतीव इत्यत्र कथं संसृष्ट्यलङ्कारः ? सलक्षणं प्रकाशयत ।
४. वदनसौरभ० कुर्वन्ति० इति पद्यद्वये संसृष्टिलक्षणं सङ्गमयत ।
५. सोदाहरणं निम्नपद्यभागस्याशयं प्रदर्शयत ।
मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऊनचत्वारिंशः पाठः

सङ्करालङ्कारपरिचयः

३९.१ *सङ्करालङ्कारस्वरूपम्*

अत्र शब्दालङ्काराणामर्थालङ्काराणां शब्दार्थालङ्काराणां वा नीरक्षीरन्यायेन संमिश्रणं भवति। अलङ्कारोऽयमलङ्काराणां मिथोऽङ्गाङ्गिभावतया,एकाश्रयानुप्रवेश-तया, सन्दिग्धतया च त्रिविधः ।

३९.२ *सङ्करालङ्कारभेदाः*

यत्र परस्परमङ्गाङ्गिभावतया, एकाश्रयतया, सन्दिग्धतया चालङ्काराणां नीरक्षी-रन्यायेन सम्मिश्रणं भवति तत्र सङ्करालङ्कारः । तल्लक्षणं यथा –

अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।
सन्दिग्धे च भवति सङ्करस्त्रिविधः पुनः ।।

३९.३ *अङ्गाङ्गिभावसङ्करालङ्कारः*

यत्र द्वयोर्बहूनां वाऽलङ्काराणां परस्परमङ्गाङ्गिभावस्तत्र, अङ्गाङ्गिभावसङ्करो भवति। यथा –

अनुरागवती सन्ध्या दिवसस्तत्पुरसरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ।।

अत्र समासोक्तिः विशेषोक्तेरङ्गतयाऽङ्गाङ्गिभावसङ्करः ।

३९.४ *एकाश्रयानुप्रवेशसङ्करालङ्कारः*

यत्रैकस्मिन्नेवाश्रयेऽलङ्कारा मिश्रिता भवन्ति तथाविधोऽलङ्कार एकाश्रयानु-प्रवेशसङ्कर इत्युच्यते । यथा –

स्पष्टोल्लत्किरणकेशरसूर्यविम्ब -
विस्तीर्णकर्णिकमथो दिवसारविन्दम् ।
श्लिष्टाष्टदिग्दलकलापमुखावतार-
बद्धान्धकारमधुपावलिः सञ्चुकोच ।।

अत्र 'किरणकेशर' 'सूर्यविम्बविस्तीर्णकर्णिक' इत्यत्र रूपकस्यानुप्रासस्य चैकाश्रयानुप्रवेशतया सङ्करः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३९.५ *सन्देहसङ्करालङ्कारः*

यत्रानेकालङ्काराणां सन्देहो भवति तत्र सन्देहसङ्करो भवति । यथा–

नयनानन्ददायिन्या विम्बमेतत्प्रसीदति
अधुनापि विरुद्धाशमवशीर्णमिदन्तमः ।

अत्र मुखस्य विम्बत्वेनाध्यवसानात् किमतिशयोक्त्यलङ्कारः, यद्वा एतदिति पदेन मुखरूपमुपमेयं निर्दिश्य विम्बारोपाद् रूपकम्, अथवा मुखचन्द्रयोः प्रस्तुतयोः प्रसीदतीति क्रियैकसम्बन्धाद् दीपकम्, किं वा उभयोरेव वर्णनीयतया प्रसाद–क्रियैकसम्बन्धात् तुल्ययोगिता, इत्यनेकालङ्काराणां सन्दिग्धत्वेन सन्देहसङ्करालङ्कारः ।

३९.६ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. सङ्करालङ्कारस्य परिचयं दत्त ।
२. सङ्करालङ्कारस्य लक्षणं सोदाहरणं प्रकाशयत ।
३. संसृष्टिसङ्करयोः सोदाहरणं पार्थक्यं निर्दिशत ।
४. सङ्करालङ्कारस्य कति भेदाः ? सोदाहरणं स्फुटीकुरुत ।
५. निम्नपद्यांशस्याशयं सोदाहरणं निरूपयत ।

अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।
सन्दिग्धे च भवति सङ्करस्त्रिविधः पुनः ।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चत्वारिंशः पाठः

अलङ्कारोपस्थित्यभ्यासः

अलङ्काराः	लक्षणसङ्केतः	उदाहरणसङ्केतः	विवरणम्
अनुप्रासः	अनुप्रासः शब्द०	लताकुञ्जम्० आदाय वकु०	- व्यञ्जनवर्णानामावृत्तिः - रसाद्यनुगुणतया प्रकर्षेण आसः = अनुप्रासः ।
यमकम्	सत्यर्थे पृथ०	नवपलाश०	- पृथगर्थायाः स्वरव्यञ्जनसंहतेस्तेनैव क्रमेणावृत्तिः ।
श्लेषः	श्लिष्टैः पदैः०	प्रावृषं०	- अत्रैक एव नानार्थकः शब्दोऽनेकार्थान् बोधयति ।
उपमा	उपमानेन०	गत्या विभ्रम०	- अत्र प्रत्ययाव्ययतुल्यार्थसमासैरुपमयस्योपमानेन सादृश्यं वर्ण्यते। - इयं पूर्णा लुप्ता च ।
रूपकम्	तद्रूपकमभेदो०	निशया०	- अत्र उपमानोपमेययोरभेदारोपः । - रूपयति = उपमानोपमेययोरभेदारोपं करोतीति रूपकम् ।
अतिशयोक्तिः	निमित्ततो वचो०	कमलमन० अन्यदेवास्य० यदि स्यान्मण्डले० अग्रे मानो गत०	- वर्णनीयस्य वस्तुन उत्कर्षं प्रतिपादयितुं लोकातिक्रान्तत्वेन वर्णनम् । - अतिशयिता = प्रसिद्धिमतिक्रान्ता उक्तिः, अतिशयोक्तिः
उत्प्रेक्षा	संभावनमथो०	पिनष्टीव रथा०	- वर्णनीयस्यावर्णनीयेन संभावनम्। - उत्प्रेक्ष्यते इत्युत्प्रेक्षा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अलङ्काराः	लक्षणसङ्केतः	उदाहरणसङ्केतः	विवरणम्
अपह्नुतिः	प्रकृतं प्रतिषिध्या०	नेदं नभोमण्डल०	– प्रकृतं निषिध्याप्रकृतस्य स्थापनम्
दीपकम्	प्रस्तुताप्रस्तुतयो०	बलावलेपा० नृत्यन्ति०	– प्रस्तुताप्रस्तुतयोरेकधर्माभिसम्बन्धः । – एकस्य कारकस्यानेकासु क्रियासु सम्बन्धः
समासोक्तिः	समासोक्तिः०	ललिततरतरङ्गै०	– प्रस्तुतेऽप्रस्तुतव्यवहारारोपः। समासेनार्थद्वयस्योक्तिः = समासोक्तिः
दृष्टान्तः	चेद्बिम्ब०	त्वमेव कीर्ति०	– भिन्नवाक्यगतयोः प्रकृताप्रकृतयोर्विषययोर्विम्बप्रतिविम्बभावः ।
स्वभावोक्तिः	स्वभावोक्तिस्तु०	ग्रीवाभङ्गाभिरामं०	– शिशुपशुपक्षिप्रभृतीनां स्वभाववर्णनम्
अर्थान्तरन्यासः	उक्तिरर्थान्तरन्यासः०	हनुमानब्धि०	– विशेषार्थस्य सामान्येन सामान्यार्थस्य विशेषार्थेन वा समर्थनम्
परिसङ्ख्या	परिसङ्ख्या निषि०	स्नेहक्षय०	– एकस्मिन् कस्याप्यस्तित्वं निषिध्य परस्मिन् तस्य स्थापनम्
विरोधाभासः	आभासत्वे विरो०	ब्रह्मण्योऽपि०	– अत्रापततो विरोधः प्रतीयते परिशीलने विरोधपरिहारः
संसृष्टिः	मिथोऽन०	देवः पायादपाया०	– अत्रालङ्काराणां तिलतण्डुलमिश्रणन्यायेन प्रयोगः
सङ्करः	अङ्गाङ्गित्वे०	अनुरागवती० स्पष्टोल्लसत्० नयनानन्द०	– अत्रालङ्काराणां नीरक्षीरमिश्रणन्यायेन मिश्रणम् । – अलङ्कारोऽयं त्रिविधः– अङ्गाङ्गिभावः, एकाश्रयानुप्रवेशः, सदिग्धश्चेति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महेन्द्र-संस्कृत-विश्वविद्यालयका महत्वपूर्ण प्रकाशनहरु

	पुस्तक	लेखक/सम्पादक/अनुवादक/टीकाकार	मूल्य
१.	स्कन्दपुराणस्य अम्बिकाखण्ड :	सं. कृष्णप्रसाद भट्टराई	१२५/-
२.	कालचक्रान्तर्गतो ज्यौतिषभाग :	सं. प्रा. श्रीनयराज पन्त आदि	५०/-
३.	रामराज्यम्	ले. पूर्णप्रसाद ब्राह्मण	२५/-
४.	षड्दर्शनीसङ्ग्रहः	ले. जायराज, सं. डा. दीर्घराज घिमिरे	३०/-
५.	जनकदर्शनम्	ले. डा. स्वामी रामानन्दगिरी	११५/-
६.	श्रीकृष्णश्रीरामचरितादर्शः	ले. पूर्णप्रसाद ब्राह्मण	३५/-
७.	श्रीकृष्णचरितामृतम्	ले. पं. दधिराम मरासिनि	२०/-
८.	स्तवमाला	ले.पं. दधिराम मरासिनि	३०/-
९.	पदार्थीयदिव्यचक्षुः	ले. सुमति उमापति, सं. प्रा. श्रीरामेश्वर शर्मा	४५/-
१०.	हरिकेलिमहाकाव्यम्	ले. वंशमणि, सं. डा. वेणीमाधव ढकाल	२००/-
११.	श्रीस्वर्गद्वारी-महाप्रभुचरित्र	ले. दुर्गादत्त पौडयाल	४५/-
१२.	संस्कृतविद्वत्सम्मेलनसंस्मरणग्रन्थः	सं. प्रा. श्रीशिवहरि मरहट्टा आदि	२४०/-
१३.	संस्कृतशिक्षणाभ्यासः (प्रथमभागः)	ले. प्रा. श्रीनीलमणि ढुङ्गाना	५२/-
१४.	संस्कृतशिक्षणाभ्यासः (द्वितीयभागः)	ले. प्रा. श्रीनीलमणि ढुङ्गाना	५०/-
१५.	आशौच-विवेचन	ले.प्रा. डा. रामचन्द्र गौतम	७५/-
१६.	मधुरिमा (संस्कृतकवितासङ्ग्रहः)	सं. सहप्रा. श्रीभागवत शर्मा आदि	२५/-
१७.	गण्डकीगौरवम्	ले. उमानाथ पन्थी, सं. डा. वेणीमाधव ढकाल आदि	३०/-
१८.	श्रीरामचरितामृतम्	ले. दधिराम मरासिनि, सं. डा. वेणीमाधव ढकाल आदि	५०/-
१९.	साहित्यप्रवेशिका	ले. प्रा. श्रीतीर्थराज सुवेदी आदि	५०/-
२०.	व्याकरणप्रवेशिका	ले. प्रा. श्रीस्थानेश्वर गौतम आदि	१००/-
२१.	श्री ५ वीरेन्द्र ग.आ.र.म. स्मारिका	सं. प्रा. श्रीस्थानेश्वर गौतम आदि	१००/-
२२.	कर्मकाण्डभास्करः	ले. दधिराम मरासिनि, सं.डा. वेणीमाधव ढकाल आदि	२१५/-
२३.	संस्कृत-नेपाली शब्दकोशः	ले. कुलचन्द्र गौतम, सं. डा. वेणीमाधव ढकाल आदि	२६५/-
२४.	तन्त्रचिन्तामणिः (पूर्वभागः)	ले. नवमी सिंह, सं. प्रा. श्रीविद्यानाथ उपाध्याय	२९०/-
२५.	नेपाली कविता र ध्वनिसिद्धान्त	प्रा. अम्बिकाप्रसाद अधिकारी	४०/-
२६.	स्थानीय जडिबुटीद्वारा स्वास्थ्य रक्षा	ले. डा. श्याममणि अधिकारी	१२५/-
२७.	गोरखादरवार क्षेत्रको सांस्कृतिकपक्ष	ले. लोकप्रसाद शर्मा भट्टराई	२८५/-
२८.	ब्रह्मसूत्रशाङ्करभाष्यम्- समन्वयाध्यायः नेपाली भाषानुवादसहितः	भाष्यकार-शङ्कराचार्य, अनु. पं. मीनप्रसाद नेपाल, सं. डा. वेणीमाधव ढकाल आदि	४१५/-
२९.	हरिकेलिनवनीतम्, मञ्जुबोधिनीटीका-विलसितम्	ले. वंशमणि शर्मा टीकाकार- डा. वेणीमाधव ढकाल	६८/-
३०.	सुन्दरचरितनाटकम्, यशोदाभिधया संस्कृतटीकयालङ्कृतम् (प्रेसमा)	ले. छविलाल सूरि टीकाकार- प्रा. नीलमणि ढुङ्गाना	
३१.	संस्कृतरचनाप्रकाशः (प्रथमो भागः)	ले. प्रा. नीलमणि ढुङ्गाना आदि	
३२.	संस्कृतरचनाप्रकाशः (द्वितीयो भागः)	ले. प्रा. नीलमणि ढुङ्गाना	५८/-
३३.	संस्कृतरचनाप्रकाशः (तृतीयो भागः)	ले. प्रा. नीलमणि ढुङ्गाना	४२/-
३४.	गण्डकीमाहात्म्यम्	अनुवादक-डा. टीकाराम अधिकारी	७३/-
३५.	अष्टाङ्गसङ्ग्रहः, अंग्रेजी-नेपाली भाषानुवादसहितः (प्रेसमा)	ले. वाग्भट अनुवादक- डा. [illegible] अधिकारी	

CC-0. Nepal Sanskrit Academy, Kathmandu Collection